CHUNILAL GANDHI VIDYABHAVAN
SURAT.

Manuscripts Library
S.D.P.B.
Coll. No. 657

Title Śiromaṇi

CHUNILAL GANDHI VIDYABHAVAN, SURAT

Shastri Dinmanishankar Pustak-Bhandara

No.: 857 Subject: ~~Śiromaṇi~~ Nyāya.

Title: Śiromaṇi (900)

Author: — Scribe: Śivabhadra Dīkṣita.

Date of the work: — Date of the Ms.: —

Place of the work: — Place of the Ms.: —

Size: 10.5" by 4.5" Extent: 30 foll.

Language: Sanskrit Script: Devanāgarī

Remarks: Incomplete.

पाठकोपनामकदीक्षितशिवचन्द्रस्यरामनन्दसुतस्य लेपम्

॥१॥ ॥श्रीगणेशायनमः॥श्रीगुरुगणपतिवटुकशारदाभ्योनमः॥श्रीगौरीपतयेनमः॥गंगायै
ॐनमःसर्वभूतानिविष्टभ्यपरितिष्ठते॥अखंडानंदबोधायपूर्णायपरमात्मने॥१॥अध्ययनम
वनाभ्यांसारंनिर्णीयनिखिलतंत्राणां॥दीधितिमधिचिंतामणितनुतेतार्किकशिरोमणिःश्री
मान्॥२॥परखुष्टनयान्निवर्त्तमानामननास्वादरसाविशुद्धबोधैः॥रघुनाथकवेरपेतदोषाकृ
तिरेषाविदुषांतनोतुमोदं॥३॥न्यायमधीतेसर्वस्तनुतेकुतुकान्निबंधमप्यत्र॥अस्यतुकिमपि
रहस्यंकेचनविद्वांसुमीशतेसुधियः॥४॥मान्यान्प्रणम्यविहितांजलिरेषभूयोभूयोविधायवि
नयंविनिवेदयामि॥दूष्यंवचोममपरंनिपुणंविभाव्यभावावबोधविहितोनदुनोतिदोषः॥५॥पूर्वा
परग्रंथैकवाक्यताप्रतिपत्तयेशिष्याणामवधानायचसंगतिंप्रदर्शयन्ननुमाननिरूपणंप्रतिजा
नीते॥प्रत्यक्षेत्यादि॥अत्रोपजीव्योपजीवकभावःफलतःस्वरूपतश्च॥प्रत्यक्षफलस्यानुमि शिवः
त्यनुव्यवसायादेरनुमित्युपजीवकत्वेपिनसर्वाप्रत्यक्षप्रमितिस्तथा॥अनुमितयस्तुसर्वाःसा
क्षात्परंपरयावाव्याप्त्यादिप्रत्यक्षोपजीविकाः॥पुरस्कृतश्चायमुपजीवकतोत्कर्षः॥यद्यपिसक ॥१॥
लमेवप्रत्यक्षफलमुपजीवत्यदृष्टजननीसमयमलकर्त्तव्यतादिपरिच्छेदिकामनुमितिं॥ईश्वरप्र

प्रमाणेष्वोपमानकम्

त्यक्षंतुनफलं॥तथापिदृष्टद्वारकमिहतथात्वमादरणीयं॥इतरस्याविनिगम्यत्वात्॥सर्वंचानुमि
तिकरणमिंद्रियापेक्षोत्पत्तिकं॥अनुमितिंभावयतोपीश्वरज्ञानस्यतत्करणताप्रत्यासत्तिवि
रहेणतत्वात्॥सर्वंपुनरिंद्रियंनानुमानाधीनजन्ममनःश्रवणयोरजन्यत्वात्॥दृष्टद्वारावात
त्वमादरणीयं॥नचोत्पत्तिमदपींद्रियंदृष्टद्वारकमनुमानमपेक्ष्यते॥अथोपजीव्यंनिरूप्यैवोपजी
वकंनिरूप्यतइतिननियमः॥क्वचित्कार्यंनिरूप्यापिकारणनिरूपणादितिचेत्॥किंचातः॥नहिसंग
तिरनंतराभिधानव्याप्या॥अपानंतर्याभिधानप्रयोजकजिज्ञासाजनकज्ञानविषयोह्यर्थःसं
गतिः॥ज्ञायतेचकार्येकारणेवाज्ञातेकारणत्वस्यकार्यत्वस्यचज्ञानात्किमस्यकारणंकार्यंवेति
जिज्ञासा॥तस्तयोर्द्वयोरपिसंगतित्वं॥इत्थंचोपजीवकतायास्तत्वेपिनक्षतिरितिमंतव्यं॥ल
घवादत्रैवोपमानस्यसंगतिंदर्शयति॥बहुवादीति॥सुप्रसिद्धतयानिरसनीयास्यवादिविप्रतिपत्ति
कत्वेनसुप्रतिपत्तयाचाऽनुमानएवव्युत्पित्सोःप्रथमंजिज्ञासांनोपमाने॥अप्रसिद्धत्वात्॥निरसनीय
बहुतरवादिविप्रतिपत्तिकत्वेनातिदुरूहत्वाच्च॥अतस्समिकीरीतिमनुरुध्यचेदं॥तेनाक्वस्यचित्प्रश्न
रूपे जिज्ञासोदयेपिनक्षतिः॥तथाचात्रावसरसंगत्योपमाननिरूपणमितिभावः॥यथाचाह्न

॥सार्वभौममतं … तरेत्यादिना॥ पंततद्वति॥ अपदृष्टजनिकायाविहितत्वे स्यादिशेषदृष्टत्वमिति स्त्रप्रयासार्थं समवदित्यत्र
पर्णीयनयाऽ … तदिमर्शमपेक्षितं॥ प्रतीनिमित्तमेवेति॥ प्रत्य॥ अपनुमानमपि … पदृष्टजनक प्रवृत्त्योपयिकं समभापर्यन्ति दृष्टेदर्श उपमान …
शि० मू० अप
विरुप्रमिति॥ तथानुमानत्वावच्छेदेनापि उपजीवकत्वेनेतिदर्थ॥ तदसत॥ अपनादिमिसारे अनुमानत्वावच्छेदेनापि तत्संभवात्॥ एवं प्रत्यक्षस्याधारत्वं …

स्य संगतिस्त्वंतथाप्युक्तत्वाकरे॥ शब्दांतरसमयग्राहकं स प्रवृत्तिनिमित्तकत्वबोधकं सामान्यत
ततोऽदृष्टजनकप्रवृत्त्योपयिकं चानुमानमपेक्षतेनिखिलमेवोपमानमिति॥ इत्थमप्युपजीवक
॥२॥
वसंगतिरित्यपिकेचित्॥ संभवतिचेहनिरूपणयोरपिकार्यकारणभावः॥ अपयतत्पूर्वकमित्यादिसूत्रे
ऽप्रत्यक्षपूर्वकत्वेनानुमाननिरूपणात्तत्पदेन च व्याप्त्यादिप्रत्यक्षपरामर्शात्॥ अत्रापिसहचारप्रत्य
क्षजन्यत्वादिनातन्निरूपणात्॥ तस्यचप्रत्यक्षनिरूपणाधीनत्वात्॥ एवमनुमानभिन्नत्वेनोपमा
ननिरूपणमप्यनुमाननिरूपणापेक्षमितिसंक्षेपः॥ तत्र॥ लक्षणस्वरूपप्रामाण्यादिभिरनुमानेनैनि
रूपणीये॥ करणस्यक्रियाभेदाभिन्नमूर्तिकतयाक्रियालक्षणपूर्वकं तल्लक्षणमाह॥ व्याप्तीत्यादि
ना॥ ॥ अपत्रव्याप्तिविशिष्टत्वपक्षधर्मत्वसामानाधिकरण्यावगाहिज्ञानजन्यत्वमर्थः॥ कर्मधारये शिवः
तरभावप्रत्ययस्यपदार्थतावच्छेदकद्वयसामानाधिकरण्यवचनत्वात्॥ ज्ञानपदोपसंहारेनेनचबा
धिताबाधितसाधारणंतत्ज्ञानजन्यत्वान्नोतानुमित्यव्याप्तिरित्याहुः॥ तन्न॥ परामर्शेननियमतो
व्याप्तिवैशिष्ट्यादिसामानाधिकरण्यग्रहेमानाभावात्॥ गौरवेणतद्विषयकत्वेनाहेतुत्वात्॥ संबंधसं ॥२॥
बंधाग्रहेपिविशिष्टज्ञानत्वस्योपपादितत्वात्॥ धर्मस्थलेचतादृशसामानाधिकरण्याप्रसिध्यातत्ज्ञा

१॥०
नस्याभावात्॥ अपसत्त्वप्रतीतिनिरासात्॥ अपवांतरवाक्यार्थायोग्यत्वनिर्णयेमहावाक्यार्थज्ञानानुदयात्॥ विषाणे
शशासंबंधाभावनिश्चयदशायांशशविषाणजन्यमिदं कार्मुकमितिशाब्दबुद्धेर्भ्रमेणेपिदुरुपपादत्वात्॥
नचात्रप्रमाणप्रस्तावात्प्रमैवलक्ष्या॥ यद्विचत्तल्लिंगकपरामर्शादपिभ्रातानुमितिस्तत्रचरमज्ञा
नपदंप्रमापरमितिवाच्यं॥ अपव्याप्यापक्षधर्मयोस्तत्त्वावगाहिनापरामर्शेनजनितायांवस्तुतःसा
ध्यवत्पक्षा … वगाहिन्याप्रमायामव्याप्तेः॥ लिंगोपहितलैंगिकभाननिरासेनांशिकत्वमत्वस्याप्य
योगात्॥ ईश्वरीयतादृशज्ञानजन्यत्वस्यचातिप्र … संजकत्वात्॥ अपतएवव्याप्तिविशिष्टेपक्षध
६
र्मतातत्ज्ञानंवेत्यादिकमपास्तं॥ पक्षपिव्याप्तिविशिष्टंचपक्षधर्मश्चेतिद्वंद्वाश्रयणात्॥ व्याप्तिवि
शिष्टत्वपक्षधर्मत्वोभयावगाहिज्ञानजन्यत्वंलभ्यते॥ पदार्थयोरभेदेपिपदार्थतावच्छेदकभेदेनैव
प्रमाणप्रमेयेत्यादिसूत्रेऽपन्यत्रचबहुशोद्वंद्वस्यदर्शनात्॥ पदार्थद्वयाभेदबोधकाकर्मधारयाद्द्वं
उनरु
द्वाभेदोदासीनपदार्थद्वयबोधकत्वेनैवद्वंद्वस्यभेदात्॥ व्याप्तिविशिष्टपक्षस्यधर्मपरतयावाव्याप्तिवैशि
ष्ट्यपक्षधर्मत्वयोर्लाभात्॥ नचैवम॥ लोकोवह्निव्याप्योधूमवान्पर्वतइतिज्ञानजन्येऽतिव्याप्तिः॥ एकत्र
तदुभयावगाहित्वस्यात्रत्वादितिकेचित्॥ तदप्यसत्॥ एवमपिवह्निव्याप्योऽयंपर्वतवत्तीतिज्ञान

धूमो२

॥३॥ न्येऽतिप्रसंगः॥ एकरूपेण तदुभयावगाहित्वोक्तौ च मीमांसकमतानुप्रवेशः॥ मिथः तदुभयोपश्ले
गाहित्वस्य परामर्शाव्यापकत्वात्॥ न च तदुभयविषयकत्वनियतधर्मावच्छिन्नकारणताप्रतियोगि
ककार्यताशालित्वमर्थः॥ पक्षधर्मतापदोपादानवैयर्थ्यापत्तेः॥ व्याप्तिविशिष्टं व्याप्तिप्रकारकं यत्पक्षधर्म
ताज्ञानं तज्जन्यमितित्वस्यात्॥ यद्यप्यत्रापि धूमसमानाधिकरणात्यंताभावप्रतियोगितानवच्छेदक
वह्नित्वावच्छिन्नवह्निसमानाधिकरणो धूमवानित्यादिपरामर्शजन्येऽव्याप्तिः॥ अखंडव्याप्तेरप्रसिद्धे
॥ क्रमानुमितेर्लक्ष्यत्वेच्छात्रा काशमात्मन इत्यादौ स्फुटतरं तथा॥ तथापि तावत्पदार्थानां तथाविधो
परस्परोपश्लेषावगाहित्वमत्र विवक्षितं॥ न च व्यतिरेकिण्यव्याप्तिः॥ व्यभिचारधीविरोधिधीवि
षयत्वेनान्वयव्यतिरेकव्याप्त्योरनुगमात्॥ न च तर्हि धूमसमानाधिकरणात्यंताभावप्रतियोगि
वह्निसमानाधिकरणधूमत्वे वह्न्यभावव्यापकाभावप्रतियोगिधूमत्वे वा गृहीते नियमतो वह्निव्यभि शिवः
चारधीप्रतिरोधः॥ तथाविधधूमसमानाधिकरणत्वादिके तु न तथा॥ सामानाधिकरण्यग्रहेपि व्यभि
चारग्रहात्॥ व्यतिरेकसहचारेणान्वयव्याप्तिग्रहणाश्रयणाद्वा॥ न च धूमसंशयोत्तरप्रत्यक्षे प्र
तिविशेषदर्शनस्य हेतुतामतेत्रातिव्याप्तिः॥ तथाविधनिश्चयत्वेन हेतुताया विवक्षितत्वात् ॥३॥
ता

विशेषदर्शनस्य भ्रमादिविरोधित्वेन तत्त्वमित्युक्तत्वात्॥ अत एव लिंगवत्त्वादिलक्षणेऽतिदेशवा
क्यार्थज्ञानजन्योपमितौ नातिव्याप्तिः॥ तथाविधवाक्यार्थप्रतिसंधानत्वेन तस्य हेतुत्वात्॥ न चोपन
यार्थज्ञानजन्यन्यायार्थज्ञाने॥ तच्छब्देन संकेतितशब्दांतरेण वा व्याप्त्यादिविशिष्टोपस्थितिद्वारा जनि
ते शाब्दबोधेऽतिव्याप्तिः॥ व्युत्पादयिष्यते हि महावाक्यार्थज्ञानस्यावांतरवाक्यार्थधीजन्यत्वे तदादे
श्च विशेषरूपेणोपस्थापकत्वमिति वाच्यं॥ तत्रातिरिक्तस्य पदजन्यत्वस्य कारणतावच्छेदकेऽनुप्रवेशात्
निश्चयत्वस्याप्रवेशाच्च॥ न च तथापि तत्तद्विशिष्टवैशिष्ट्यज्ञानं प्रति तत्तद्विशेषणतावच्छेदकप्रकारकनि
श्चयत्वेन हेतुत्वात्तादृशे शाब्दबोधे प्रत्यक्षे चातिव्याप्तिः॥ दंडो रक्तो न वेति संशये रक्तदंडवानयमिति ज्ञा
नानुदयादिति वाच्यं॥ ज्ञानोपरमेपि विशिष्टविषयोपधानेनेच्छाद्वेषयोः कृते श्च साक्षात्कारात् विशेषणविष
यकाद्विशिष्टसंस्कारादेव विशिष्टस्मरणाच्च॥ तद्विषयकगुणेनो तत्र हेतुत्वेन्यूनवृत्तेर्ज्ञानत्वस्याप्रवेशा
त्॥ इच्छादितः संस्काराच्चानुमितेरनुदयात् संस्काराद्यन्यत्वस्य गुरुतया ज्ञानत्वेनैव तत्र हेतुत्वात्॥ न च
परामर्शानुव्यवसायेऽतिव्याप्तिः॥ सामान्यतः प्रत्यक्षे विषयत्वेन तत्तद्विषयकप्रत्यक्षे तत्तत्त्वेन कदाचि
त् ज्ञानादिप्रत्यक्षे ज्ञानत्वादिना हेतुत्वेन तुल्यावानेवत तदितरत्वादि विषनिष्ठो धर्मस्तेन तद्विषयत्वेन

शि० स्प०

॥४॥

कार्यकारणभावोभिन्नावलोकितत्वेवैचित्र्यनिर्मितलौजेतरघटतद्विषयकत्वादिनातत्त्वेऽनंतकार्य
कारणभावप्रसंगात्॥मानाभावादन्यथोपपत्तेश्च॥अथविशिष्टस्मरणेऽतिव्याप्तिः॥नचोपेक्षान्य
त्वेनतत्रहेतुत्वं॥उपेक्षात्वंहिनजातिः॥चाक्षुषत्वादिनाजातिसंकरप्रसंगात्॥औपाधिकत्वोपगमाच्च॥
नापिप्रवृत्तिनिवृत्त्यजनकत्वं॥अजिज्ञासितविषयत्वंवा॥तादृशादपिस्मृत्युत्पादात्॥नापिसंस्का
राजनकत्वं॥तज्जनकतावच्छेदकरूपांतरापरिचयादन्योन्याश्रयप्रसंगाच्च॥संस्कारानुत्पत्तावेवास्म
रणसंभवेस्मृतिजनकतायांतदप्रवेशाच्च॥नाप्यनुभवत्वेनतथात्वं॥संस्कारस्यफलनाश्यतयास
कृदनुभूतस्यस्मरणोत्तरमस्मरणप्रसंगात्॥समानाकारस्यैवफलस्यनाशकत्वात्तत्समूहालंबना
दितोनैकैकगोचरक्रमिकस्मरणानुपपत्तिः॥जायतेचपुनःपुनःस्मरणात्दृढतरसंस्कारः॥परित्य
ज्यचनिश्चिताव्यभिचारकंरूपंगृह्यमाणव्यभिचारेणकारणत्वकल्पनानुदयात्॥इदमेववाऽन्यत्रसाम शिवः
न्यस्यहेतुतावच्छेदकत्वेबीजं॥अभिहितंचतात्पर्यटीकायांप्रथमसूत्रेऽवयवविवेचनप्रस्तावेमिश्रैः
स्मृतीनांस्वकार्यसंस्कारविरोधिनीनांमहत्संभावादितीतिचेन्न॥चमेरेज्ञानपदस्यअनुभवपर
त्वात्॥साक्षात्तज्जन्यत्वस्यविवक्षितत्वादित्यपिकश्चित्॥किंचव्याप्यविशेष्यकात्पक्षविशेष्यका ॥४॥

च्चपरामर्शादनुमितिदर्शनात्तदनुनयवैशिष्ट्यावगाहिनिश्चयत्वेनतत्रहेतुत्वं॥लक्षणघ
टकमपितदेव॥एकतरविशेष्यकज्ञानादन्यतरविशेष्यकस्मरणात्॥अन्यथानियमेनस्मृतेरु
भयविशेष्यकत्वप्रसंगात्॥समानप्रकारकत्वेनैवस्मरणयोःकार्यकारणभावाच्चतत्रविशिष्टैव ज्ञान३
कार्यकारणभावः॥नतुतत्तद्रूपेणगौरवान्मानाभावाच्च॥एवंचविशिष्टबोधादौकापिनातिप्रसंग
शंकापि॥वह्न्याद्यनुमितौचवह्न्यादिव्यभिचारधीविरोधिधीविषयधर्मप्रकारकपक्षधर्मताज्ञा
नत्वेनहेतुत्वमितिनिस्तरं॥लक्षणेपितथैवनिवेशात्॥अतएवव्याप्यवत्पक्षाद्यभावग्रहप्रतिव्या
प्यवत्पक्षादिज्ञानत्वेनहेतुत्वेपिनक्षतिः॥व्याप्तिविषयकत्वेनवाजन्येज्ञानेविशेषणीयं॥एतेनस्मृ
तिप्रतिसंस्कारद्वाराऽनुभवंप्रतिचसाक्षाद्विशेषणधियोहेतुत्वस्यनिर्विकल्पकात्मकस्यवा
स्मरणस्यअनुभवंप्रत्येववातस्याहेतुत्वस्यनियमतःकृतिसाक्षात्कारपूर्वविषयस्मृतेश्च
कल्पनात्व्याप्यवत्पक्षवत्त्वादिज्ञानेऽतिव्याप्तिरित्यपिपरास्तं॥साध्यादेरननुगमादेकोपादानेऽन्या
नुमितौदैवाद्व्याप्तिविषयिण्यांचतस्यामव्याप्तिः॥परमवशिष्यते॥सापितादृशज्ञानवत्त्वेननुभव

त्वव्याप्यजातिमत्त्वविवक्षयानिरसनीया॥एतद्भ्रमायैवानुभवार्थकंचरमज्ञानपदं॥एवंचान्वयव्यति
रेकव्याप्त्योः पृथक्प्रयोजकत्वेपिनक्षतिः॥पर्वतत्ववह्निव्याप्यवैशिष्ट्यावगाहिनिश्चयत्वावच्छिन्नकारण
ताप्रतियोगिककार्यतायाः॥वह्निव्याप्यवत्पर्वतत्वनिश्चयत्वावच्छिन्नकारणताप्रतियोगिकव्याप्तिविषय
कवृत्तिकार्यतावावच्छेदिकाज्ञानवृत्तिःसामानाधिकरण्येनावच्छेदिकावाया जातिस्तद्वत्त्वंवाबोध्यं॥
व्याप्तिमानिःऽवश्यंभासमानोयस्तादृशानुमित्यविषयोयस्तदविषयत्वमात्रंवाग्राह्यं॥यांकांचिदनुमि
तिव्यक्तिमादायतद्व्यक्तिसमवेतानुभवत्वान्यानुभवान्यासमवेतधर्मसमवायित्वंवावक्तव्यं॥अ
नुभवत्वजात्यनंगीकारेतुतद्व्यक्तिसमवेतस्मरणासमवेतधर्मसमवायित्वमितिवक्तव्यं॥व्याप्तिज्ञा
नत्वावच्छिन्नकारणताप्रतियोगिककार्यतावच्छेदकावच्छिन्नायांविशिष्टपरामर्शत्वावच्छिन्नकार शिवः
णताप्रतियोगिककार्यतातत्समानाधिकरणानुभवत्वंजातिमत्त्वेतत्त्वमित्यपिकेचित्॥परेतु॥प भाष
क्षधर्मतेत्यत्रपक्षताविशेषणं तथाचपक्षतासहकृततादृशपरामर्शजन्यत्वमित्यर्थः॥यथोक्ताया ॥५॥
विशेष्याद्यभावद्वयायावापक्षतायाः प्रत्यक्षस्यवारणाय परामर्शोपादानं॥तत्त्वेनजनकत्वंमेक

क्र

५

वच्छेदेनतदुभयजन्यत्वंचविवक्षितं॥तेनबाधादिकालीनेनंदेवात्प्रतियोगिविषयकेणप
रामर्शेनाजन्येपक्षतायाः प्रत्यक्षेतदुभयसमूहालंबनेचनातिप्रसंगः॥तद्वदयत्त्वनुभव
त्वव्याप्यजातिमत्त्वविवक्षयाचनाव्याप्तिस्तद्भ्रमायचमेरज्ञानपदमित्याहुः॥तच्चि
त्यम्॥तत्करणमिति॥नचव्याप्तिज्ञानजन्यज्ञानकरणत्वेनेतरभेदसाधनेव्याप्तिज्ञान
त्वेतादात्म्यसंबंधेनव्याप्तिज्ञानमेववागमकंव्याप्तेरननुगमेपिःऽपाधिकस्यैसिद्धिवारण भाग
३१२ मात्रप्रयोजनकत्वादितिवाच्यं॥पक्षोपहितस्यलक्ष्यतयाव्याप्तिज्ञानत्वादेरतिप्रसक्तत्वा
त्॥करणत्वंव्याप्तिस्तादृशव्याप्तिज्ञानत्वत्वावधनवच्छेद्यत्वात्व्यतिरेकव्याप्तिर्गमकतयावैय
र्थ्यशंकानवकाशाच्चेति॥लिंगस्यनित्यत्वेप्यनुमितिकरणस्यस्वरूपतःप्रत्यक्षोपजीवक
त्वंव्यवस्थापयन्नाह॥तच्चेति॥अनुमितेर्ज्ञानाकरणकज्ञानत्वेनप्रत्यक्षमितिमध्यनिवेशेत
त्कारणस्यापिप्रत्यक्षप्रमाणेंतर्भावःस्यादितितन्निरस्यतितच्चेत्यपिकश्चित्॥अनुमानप्रामाण्यं
परीक्षितुंचार्वाकमतमुत्थापयति॥अथेति॥अनुमानत्वेनानिमत्तंधूमादिज्ञानंअप्रसरत्व्या

अनुमान

२५५१ त्युपनीतमेवबासंवादेनसंवादाभिमानेनसंभावितस्यासतोऽनुगताकारस्यपरमार्थसत्त्वलक्षणा
त्रसाक्षिणाध्यक्षेणानुल्लिखितादृष्टेश्चमूलकविकल्पोल्लिखितत्वाद्वासंवादः॥ अनुवादप्रामाण्येचत
न्मूलकसमयनिर्णयाधीनप्रवृत्तिकयोःशाब्दोपमानयोःसुतरामप्रामाण्यान्नाप्रत्यक्षंप्रमाणमि
त्याह॥ इतीत्यादि॥ अप्रमाणसाधर्म्येणप्रमाणताप्रयोजकरूपशून्यत्वेनदृष्टसाधर्म्यस्यसाधर्म्यद तां
र्शनस्यवा॥ नन्वभिहितमेवसाधर्म्यदर्शनंसंभावनांभावयतिसंभावनेवचबहुशोव्यवहारहेतुरित्य
तआह॥ अनुमानमिति॥ ननुनवयमापाततोभ्रमजनकलक्षणमप्रामाण्यंनिरूपयामोयेनभ्रमस्य
विषयबाधाधीनतयाप्रामाण्यंसंभाव्येतापिपरंतुप्रमाकरणत्वव्यतिरेकमतआह॥ अपिचेति॥ स्वलक्ष
ति॥ नचानुगताकारासंस्पर्शिपरमार्थसत्त्वलक्षणसाक्षिणिस्वसंवेदनसंवेदितप्रामाण्येनिर्विकल्पेन शिवः राम
नाप्रामाण्यंसंदिह्यतेपरंतुतदुत्तरभाविनिसमुल्लिखितालीकानुगताकारेसविकल्पकएवेतिवाच्यं॥ नि
र्विकल्पकस्यसन्मात्रोपलंबनस्यविषयतत्त्वप्रामाण्यावगाहित्वानामनुपाधीनसिद्धिकत्वात्स स्य
र्वमिदंसत्रि — व्याप्तिनिश्चयेस्यात्सएवतुनसंभवत्युपायाभावादित्यतआह॥ व्याप्तीति॥ ॥ ६॥

मत फ

६

॥ श्रीगणेशायनमः॥ समारब्धानुमानप्रामाण्यपरीक्षाकारणीभूतव्याप्तिग्रहोपायप्रतिपा
दननिदानंव्याप्तिस्वरूपनिरूपणमारभते॥ नन्वित्यादिना॥ साध्याभाववदवृत्तित्वस्याव्याप्य
वृत्तिसाध्यकसद्धेतावव्याप्तिमाशंक्याह॥ साध्यवद्भिन्नेति॥ साध्यवद्भिन्नेयःसाध्याभावस्त
द्वदवृत्तित्वमर्थः॥ कर्मादौसंयोगाद्यभावस्यभिन्नत्वेमानाभावादाह॥ साध्यवदिति॥ हितोःसा
त्वेप ध्यवत्पक्षभिन्नदृष्टांतवृत्तिनाव्याप्ते राह॥ सकलेति॥ साकल्यंसाध्याभाववतिसाध्येचवो
ध्यं॥ साध्याभावोवासाध्यतावच्छेदकावच्छिन्नप्रतियोगिताकोग्राह्यः॥ तेनविपक्षैकदेशनिष्ठा
भावप्रतियोगित्वव्यभिचारिणानातिव्याप्तिः॥ नवानानाव्यक्तिसाध्यकसद्धेतावव्याप्तिः॥ अव्या
प्यवृत्तिसाध्यकव्याप्यवृत्तिस द्धेतावव्याप्तेर्व्यभिचारिणिवाव्याप्यवृत्तावतिव्याप्तेर्वारणा
योगि४ याभाववद्वयप्रतिवेध्याधिकरणंबोध्यं॥ हित्वभावोपिप्रतियोगितावच्छेदकावच्छिन्नप्रतियोगिव्या
धिकरणस्तत्प्रतियोगित्वंचहेतुतावच्छेदकरूपेणबोध्यं॥ तिनद्रव्यत्वादौसाध्येविशिष्टसत्त्वादौ
नाव्याप्तिः॥ नवाविशिष्टसत्तात्त्वादिनातादृशाभावप्रतियोगित्वसत्तादावतिव्याप्तिः॥ यत्रैक
व्यक्तिकंसाध्यंविपक्षोवातत्रनिर्धूमत्वव्याप्यत्वेनसाध्येनिर्वह्नित्वादौचाव्याप्तिः॥ तत्रैक

भावस्य वह्न्यादेः प्रत्येकं यावद्विपक्षावृत्तित्वादाह ॥ साध्यवदिति ॥ अत्रान्योन्याभावस्य साध्य
वत्वावच्छिन्नप्रतियोगिताकत्वं व्युत्पत्तिबललभ्यं ॥ नहि भवति नीलो घटो पट इत्यादन्यधीरिति ॥ नापीति
साध्यमसमानाधिकरणं यस्य यदधिकरणानधिकरणं साध्यं तत्त्वं ॥ साध्यनिष्ठसामानाधिक
रण्यप्रतियोगित्वं ॥ साध्यनिष्ठाधेयत्वानिरूपकाधिकरणवृत्तित्वमिति यावत् ॥ तदनधिकरण
त्वमर्थः ॥ साध्यवद्भिन्नस्य च साध्यनिष्ठाधेयत्वानिरूपकत्वात् तद्वृत्तौ नातिप्रसंगः ॥ साध्यनिष्ठाधेय
त्वानिरूपकाधिकरणत्वं व्यापकाभावप्रतियोग्यधिकरणतासामान्यकत्वमिति तु निष्कर्षः ॥ ते
न सत्तावान् द्रव्यत्वादित्यादौ न दोषः ॥ साध्यवैयधिकरण्यं साध्यवद्भिन्नाधिकरणत्वं ॥ चरमाधि
करणत्वांशस्यानतिप्रयोजनकं तया तदपहाय द्वयमेकीकृत्य अन्द्वयं दूषयति ॥ तदुभयमपीति ॥ सा
ध्यत्वादेः साध्यं यदधिकरणानधिकरणं तत्त्वाभावः ॥ साध्यस्य यदनधिकरणं तद्वृत्तित्वाभा
वश्चार्थः ॥ तत्र ॥ केवलान्वयिनि ॥ साध्यनिष्ठाधेयत्वानिरूपकाधिकरणाप्रसिद्धा ॥ नानाव्यक्ति
साध्यके चैकसाध्यव्यक्तिनिष्ठाधेयत्वानिरूपकत्वे साधनाधिकरणव्यक्त्यंतरस्येत्यव्याप्तिः ॥ आ
द्ये ॥ क्वचिद्व्यभिचारिण्यतिव्याप्तिश्च ॥ द्वितीये च साध्यवैयधिकरण्यं यदि साध्यवत्त्वावच्छिन्नप्र

तियोगिताको भेदो विवक्षितस्तदा केवलान्वयिनि ॥ यदि च यत्किंचित्साध्यव्यक्तिभेदस्तदा नाना
धिकरणसाध्यके सर्वत्राव्याप्तिः ॥ केचित्तु ॥ साध्यासामानाधिकरण्यं हेतुतावच्छेदकसंबंधेन
हेत्वधिकरणे तेनैव संबंधेन साध्यवद्वृत्तित्वस्याभावस्तदधिकरणाभिन्नत्वमर्थः ॥ तेन धूमस्य
स्वाश्रयसंयोगेन वह्निमति च समवायेनावृत्तावपि न क्षतिः ॥ तादृशाभावश्च संबंधांतरेण वर्त्त
मानेऽपि सुलभः ॥ व्यभिचारिणस्तु व्यभिचारनिरूपकाधिकरण एव तादृशि तादृशाभाववत्त्वे ॥ सत्ता
यां गुणेन द्रव्यत्वसामानाधिकरण्यमित्यनुभवात् ॥ न चैवं गुणकर्मान्यत्वविशिष्टसत्त्वेऽव्याप्तिः ॥
विशिष्टस्यातिरिक्तत्वात् ॥ अनतिरिक्तत्वे तु विशेषणविशेष्यसंबंधस्यैव परंपरया व्याप्यत्वात् ॥ केव
लान्वयिनि चाव्याप्तेरभिधानं द्वितीयलक्षणाभिप्रायेणेत्याहुः ॥ तच्चिंत्यम् ॥ सत्तायां गुणेन द्रव्यत्व
सामानाधिकरण्यमिति प्रतीतिर्हि द्रव्यत्वे गुणेन पृथिवीत्वसामानाधिकरण्यमिति प्रतीतिवत् सत्ते
तानिष्ठद्रव्यत्वसामानाधिकरण्यावच्छेदकत्वस्य परंपरासंबंधेन सामानाधिकरण्यस्य वा अभा
वं गुणेऽवगाहते न तु सत्तायामेव द्रव्यवृत्तित्वाभावं ॥ सत्ता न द्रव्यवृत्तित्वाभाववती द्रव्यवृत्तिर्भावो
न सत्तावृत्तिरित्यादि सर्वजनसिद्धप्रतीतिबाधितत्वात् ॥ बाधकाभावात्तु संयोगतदभावयोरवृ

एकभेदेनैकत्रप्रतीत्यात्तदुभयोरेकत्रसिद्धिः॥अतींद्रियसाध्यके अतींद्रियव्यभिचारिणि अति
संगाच्च॥तत्रसामानाधिकरण्याभावस्यप्रत्यक्षासंभवेनासिद्धेः॥नचतदभाववद्वृत्तित्वेनतत्र
३९ तदनुमेयं॥तद्वृत्तिभिन्नत्वस्योपाधित्वात्॥किंचेदमिदानीमितिप्रतीतिनियामकंविशेषणता
विशेषिणहेतुतायांसद्धेतावव्याप्तिः॥तेनसंबंधेनाधिकरणेकालेतेनसंबंधेनसाध्यवद्वृत्तित्वस्य
विरहिणोऽप्रसिद्धेरिति॥समवायितयेति॥वाच्यत्वंयथानसमवायित्वयावक्ष्यते॥घटादिसम
वायितयेत्यर्थइत्यप्याहुः॥प्रमेयसाध्यकेचभावत्वेनाभावानांऽभावत्वेनभावानांवृत्तित्वेन
निर्वह्निवद्वृत्तिमात्रवृत्तिगगनत्वादिनाविरुद्धघटत्वपटत्वाभ्यांचप्रमेयमात्रस्याभावःसुल
भः॥ननुपारिभाषिकमेवाव्यभिचरितत्वं॥तथाहि॥यत्समानाधिकरणांसाध्यतावच्छेदका
वच्छिन्नव्यापकतावच्छेदकप्रतियोगिताकायावंतोऽभावाःप्रतियोगिसमानाधिकरणास्तत्वं
भूः॥सर्वेषांवाच्यत्वाद्यभावस्यतथात्वाद्याघावत्वोपादाने॥अतएवभूतत्वमूर्तत्वोभयवान्मू
र्तत्वादित्यादौद्वित्वाद्यवच्छिन्नाभावस्यप्रतियोगिसामानाधिकरण्येपिभूतत्वमनोन्यत्वा
द्यभावस्यातथात्वान्नातिप्रसंगः॥साधनसमानाधिकरणस्यगोत्वाद्यभावस्यतत्तत्साध्य

शिवः

॥८॥

2

रक्षंरूप

व्यक्त्यभावस्यचातथात्वात्साध्यतावच्छेदकेत्यादि॥येनसंबंधेनहेतुस्तेनैवतदधिकर
णंबोध्यं॥तेनात्मत्वेसाध्येसमवायेनहेतौज्ञानस्यविषयतयाऽधिकरणेघटादौवर्त्त
मानस्यसाध्याभावस्यातथात्वेपिनक्षतिः॥एवंहलांतरेपिसंबंधभेदनिबंधनोदोषःसंबं
धैक्यविवक्षयानिरसनीयः॥रूपादिसामान्याभावेसाध्येपृथिवीत्वादिकंसद्धेतुरेवप्रल
येपरमाणावुत्पत्तिकालेचावयविनितत्सत्वात्॥नचप्रतियोगिवत्तध्वंसप्रागभावयोरप्य
त्यंताभावविरोधित्वं॥मानाभावात्॥अतएवांतरालेश्यामेरक्तेरूपंनास्तीतिप्रत्ययः॥
नचैषरक्तिमध्वंसाद्यवगाही॥पूर्वापररक्तिमध्वंसप्रागभाववतिरक्तेपितथाप्रत्ययप्रसं
गात्॥तत्सामानाधिकरण्यंचस्वविशिष्टरूपत्वधिकरणावच्छेदेनबोध्यं॥तेनगोत्वेज
न्यद्रव्यत्वप्रलयावृत्तित्वादिनागवाद्यभावस्यगवाद्यनधिकरणधर्म्यवच्छेदेनतद्वृत्ति
कालेमहाकालेवावृत्तावपियदागोत्वंतदागौःयत्रकालेत्वेतत्रजन्यद्रव्यप्रलयावृत्ति
त्वादित्यादौनातिप्रसंगः॥हेतुमतिप्रलयेतत्सामानाधिकरण्याभावात्॥स्वविशिष्टेतिवि
शेषणात्॥कपिसंयो गाभाववान्मेयत्वादित्यादौसंयोगाद्यात्मकस्यसाध्याभाव

सकलहेत्वधिकरणवृत्तित्वेपि नाव्याप्तिः॥ जलादिवृत्तित्वविशिष्टगोत्वाद्यभावस्याभाव-
जलत्वाद्यभावो न तु धूमाद्यभावो जलादावपि तदभावप्रत्ययप्रसंगात्॥ यत्समानाधिक-
रणानां साध्यतावच्छेदकावच्छिन्नव्यापकतावच्छेदकरूपावच्छिन्नप्रतियोगिकानां यावद-
भावानां प्रतियोगितावच्छेदकावच्छिन्नसामानाधिकरण्यं वा तत्त्वं हेतुत्वेत्यादिना वाच्यत्वा-
दीनामभावः सुलभ एव॥ शेषं दर्शितदिशावसेयमित्यत आह॥ प्रतियोग्यवृत्तिश्चेति॥ के-
चित्तु॥ व्याप्यवृत्तेर्हेतुसमानाधिकरणस्य साध्याभावस्य प्रतियोगितायाः अनवच्छेदकं हे-
तुसमानाधिकरणस्य व्याप्यवृत्तेः प्रतियोगिव्यधिकरणस्य वाऽभावस्य प्रतियोगितायाः
सामानाधिकरण्येनानवच्छेदकं यत्साध्यतावच्छेदकं तदवच्छिन्नसामानाधिकरण्यं व्या-
प्तिः॥ एवं च व्याप्तेरव्यभिचारिसंबंधरूपतापि संगच्छते हेतौ साध्यतावच्छेदकावच्छिन्नसा-
ध्याभाववद्वृत्तित्वस्यैव साध्यतावच्छेदके हेतुमन्निष्ठसाध्याभावप्रतियोगितावच्छेदकत्वस्या-
पि व्यभिचारत्वात्॥ अवच्छेदकत्वं चेह तत्पर्याप्त्यधिकरणत्वं तेन विशिष्टवह्न्यभावस्य वह्नित्व-
वह्नित्वोभयावच्छिन्नाभावस्य च प्रतियोगितावच्छेदकत्वेपि वह्नित्वस्य न क्षतिः सत्त्ववत्ति-

गुणादौ संयोगाद्यभावेपि व्याप्यवृत्तिः॥ वक्ष्यमाणं वा प्रतियोगितावच्छेदकानतिरिक्तवृत्ति-
त्वमेवं तदवच्छेदकत्वमिहापि बोध्यं॥ न वृत्तिश्च गुणत्वगुणवृत्तित्वद्रव्यमात्रसमवेतत्वा-
द्यवच्छिन्नप्रतियोगिताकव्याप्यवृत्त्यभावप्रतियोगितावच्छेदकगुणत्वाद्यनतिरिक्तवृत्ति-
त्वसंयोगत्वमित्याहुः॥ साध्यतावच्छेदकावच्छिन्नसाध्यसामानाधिकरण्यावच्छेदक-
स्वसमानाधिकरणसाध्याभावत्वकत्वं॥ यत्समानाधिकरणसाध्याभावप्रमायां सा-
ध्यवत्ताज्ञानप्रतिबंधकत्वं नास्ति तत्त्वं वा व्याप्तिरिति तु न युक्तं॥ सर्वत्र साध्याभावप-
दवैयर्थ्यात्॥ यत्तु साध्याभाववद्वृत्तियद्वृत्तौ प्रकृतानुमितिविरोधित्वं नास्ति तत्त्वं व्याप्तिरि-
ति॥ तन्न॥ अनुमित्यविरोधित्वज्ञानस्यानुमितिजनकत्वे साध्याभाववद्वृत्तित्वज्ञानस्या-
नुमित्यविरोधितया व्यभिचारिण्यतिप्रसंगात्॥ केचित्तु॥ यावंतः साध्याभावाः प्रत्ये-
कं तत्तत्सजातीया ये तत्तदधिकरणावृत्तित्वाभावास्तद्वत्त्वं तत्त्वं॥ सा जातिश्च समानास-
मानाधिकरणधर्मावच्छिन्नप्रतियोगिताकत्वान्यतररूपेण॥ साध्याभावः पूर्वोक्तद्वि-
तीयरीत्या प्रत्येतव्यो व्याप्यवृत्तिश्च॥ प्रतियोगितावच्छेदकावच्छिन्नप्रतियोगिक-

करणेवा॥ तेन तत्तत्साध्यव्यक्तेरव्याप्यवृत्तेर्वा साध्याभाववति वृत्तावपि हेतोर्नाव्याप्तिः॥
तद्वृत्तित्वाभावश्च तत्तत्साध्याभाव वद्वृत्तित्वत्वव्यापकव्यासज्यवृत्तिधर्मानवच्छि-
न्नप्रतियोगिताको बोध्यः॥ तेन साध्याभाववद्वृत्तिविशेषवृत्तित्वस्य पार्थिवत्वादिविशे-
षितत्त्वस्य द्वित्वाद्यवच्छिन्नस्य वा साध्याभाववद्वृत्तित्वस्याभावमादाय नातिप्रसंगः॥ अत्र च
हेतुतावच्छेदकसंबंधेन साध्याभाववद्वृत्तित्वं बोध्यं॥ तेन वह्न्यभाववति स्वावयवे धूमस्य
वृत्तावपि न दोषः॥ इत्थं च साध्याभावोपि हेतुतावच्छेदकसंबंधेन कस्यचिदधिकरणे व-
र्तमानो ग्राह्यः॥ तेन जातिमान् सत्वादित्यादौ हेतुतावच्छेदकसंबंधेन साध्याभाववद्वृत्ति- शिवः
त्वस्याप्रसिद्धावपि न क्षतिः॥ यद्वा यावंतः तादृशाः साध्याभावाः प्रत्येकं तेषां सजातीयस्य
व्यापकीभूतस्य व्याप्यवृत्तेरभावस्य प्रतियोगितावच्छेदकेन धर्मेण यद्रूपावच्छिन्नं प्रति
व्यापकत्वं रूपावच्छिद्यते तद्रूपवत्वं तत्वं॥ साधनस्य तादृशाभावप्रतियोगित्वं तदवच्छेदक-
त्वं वा साधनतावच्छेदकस्येति तु न वक्तव्यं॥ द्रव्यं सत्वादित्यादौ सत्वादेः तादृशाभावव्याप- ॥१०॥
कगुणकर्मान्यत्वविशिष्टसत्वाद्यवच्छिन्नप्रतियोगिताकतादृशाभावप्रतियोगित्वाद-

तिव्याप्तेः॥ ज्ञेयप्रमेयादित्यादौ प्रमेयत्वादेः तादृशप्रतियोगितानवच्छेदकत्वादव्या-
प्तेश्च॥ प्रमेयत्वव्यधिकरणप्रतियोगित्वस्याप्रसिद्धेः॥ यद्वा यावंतः तादृशाः साध्याभावाः
प्रत्येकं तत्प्रतियोगितावच्छेदकेन धर्मेण यद्रूपावच्छिन्नप्रतिव्यापकत्वमवच्छिद्यते तद्रू-
पवत्वं तत्वमित्याहुः॥ परे तु वृत्तिमद्भूतयो यावंतः साध्याभाववद्वृत्तित्वाभावास्तद्वत्वं व्या-
प्तिः॥ येन संबंधेन हेतुता तेनैव वृत्तिमत्वमपि बोध्यं॥ तेन व्यधिकरणधर्मावच्छिन्नवह्न्यभा-
६६ ववति संयोगेन यावद्वृत्तित्वाभावस्य जात्यादौ वर्तमानस्य धूमादावसत्वेनापि न क्षतिः॥ साध्या-
भावश्च पर्वतवत् बोध्यः॥ तद्वृत्तित्वाभावोपि स्वव्यापकतत्तत्साध्याभाववद्वृत्तित्वत्वव्याप-
कप्रतियोगिताकः तत्तत्साध्याभाववद्वृत्तित्वत्वातिरिक्तेन समानाधिकरणेन वृत्तित्व-
वृत्तित्वं वृत्तिना वा धर्मेणानवच्छिन्नप्रतियोगिताको वा बोध्यः॥ तेन लोकाद्यवृत्तित्वेन रूपेण यो वह्नि-
सामान्याभाववद्वृत्तित्वस्य यश्चेंधनत्वाद्यवच्छिन्नवह्न्यभावाधिकरणीभूतमहानसवृत्तित्वा-
धर्म० दरभावस्तस्य धूमादौ स्वनिष्ठसाध्याभाववद्वृत्तित्वविरहस्य च हेतौ तत्र वृत्तेस्तस्मिन्न स-

त्वेपि न क्षतिरित्याहुः ॥ अन्ये तु वृत्तिमद्वृत्तयो यावन्तः साध्याभावसमुदायाधिकरणवृत्ति
त्वाभावास्तद्वत्त्वं ॥ तादृशवृत्तित्वाभावश्च स्वव्यापकतादृशवृत्तित्वत्वव्यापकप्रतियोगिताको
बोध्यः ॥ प्रयोजनं चोक्तप्रायं ॥ साध्याभावाधिकरणवृत्तित्वत्वव्यापकप्रतियोगिताकस्य व्य
धिकरणधर्मावच्छिन्नस्यैवाभावस्य वृत्तिमद्वृत्तित्वात् व्यभिचारिण्यपि तैरेतत्समुदायेति ॥ सा
ध्याभावश्च साध्यतावच्छेदकसंबन्धेन बोध्यः ॥ तेन समवायेन वह्निः साध्यत्वे च न संयोगेन
च तथात्वे वह्न्यवयववत्त्वे पर्वतवह्न्यवयवसंयोगे च पर्वतस्य वह्न्यवयवस्य च संबन्धद्वयावच्छिन्नव
ह्न्यभावद्वयानधिकरणत्वेपि नातिव्याप्तिः ॥ तथा स्वव्यापकीभूतसाध्यतावच्छेदकव्यापकप्रति
योगिताकोपि ॥ तेन यत्र पृथिवीत्वाभावादौ साध्ये तत्तद्विपक्षावृत्तित्वाद्यवच्छिन्नप्रतियोगिता
काभावकूटाधिकरणमप्रसिद्धं तत्र सद्धेतौ पृथिवीत्वादौ साध्ये जातित्वाद्यवच्छिन्नाभा
ववति सामान्यादाववर्त्तमाने द्रव्यत्वप्रकारकप्रमाविषयत्वादौ च नाव्याप्तिरतिव्याप्तिर्वा शिवः
नाप्यभाव. त्वादिनाभावादौ साध्ये तत्तत्साध्याभावकूटाधिकरणाप्रसिद्ध्या अव्या ॥२२॥

प्तिरित्याहुः ॥ तन्न ॥ द्रव्यत्वपृथिवीत्वोभयवान् द्रव्यत्वादित्यादौ तदुभयान्यतरत्वावच्छि
न्नाभाववति गुणादौ द्रव्यत्वादेरवृत्तेरतिव्याप्तेः ॥ अपि चेदं पृथिव्यन्यद्रव्यत्ववत् द्रव्यत्वा
दित्यादौ द्रव्यत्वत्वाद्यवच्छिन्नाभावकूटाधिकरणगुणाद्यवृत्तित्वस्य द्रव्यत्वे सत्त्वादतिव्या
प्तेः ॥ द्रव्यत्वत्वाद्यवच्छिन्नप्रतियोगितायाः पृथिव्यन्यत्वविशिष्टद्रव्यत्वत्वसमव्याप्तत्वात् ॥
किंच रूपाभावसाध्यकसद्धेतौ साध्याभावसमुदायानिविष्टसकलरूपव्यक्त्यधिकरणाप्र
सिद्धेः यावतामभावानामैकाधिकरण्यं तावतां समुदाये विवक्षितेपीदं पृथिवीवृत्तिगुणशू
न्यं सत्तान्यपृथिवीसमवेतशून्यं वा वायुत्वात् रूपवदन्यत्वाद्वेत्यादावतिव्याप्तिः ॥ तत्र
तादृशसाध्याभावस्तोमस्यानियमतो रूपादिघटितत्वेन तद्वति हेतोरवृत्तेः ॥ वस्तुतो नि
खिलानामेव रूपाणां तादृशाभावसहस्रसमानाधिकरणत्वात् समानाधिकरणयावदभा
वाधिकरणाप्रसिद्धिर्दुर्वारेति ॥ किंच हेतुतावच्छेदकसंबन्धेन यत्साध्याभाववति वृत्तिस्तदभा
वो वक्तव्यः अन्यथा धूमादावव्याप्तेः ॥ साध्यतावच्छेदकसंबन्धेन साध्यस्याभाववति का
लादौ वृत्तिमन्मात्रस्यैव वृत्तेर्व्यभिचारिण्यतिप्रसंगो वा तथा च स तादृशसाध्यके संयो

नसमवायेन वा हेतावव्याप्तिः॥ साध्याभाववत्तितेन संबंधेन वृत्तेरप्रसिद्धेः॥ साधनसमानाधि
करणत्वेन साध्याभावाविशेषणीयाद् इति चेत् विशेष्यंतोत यापि मूर्त्तत्वमूर्त्तत्वाद्योरन्यतरत्व
नाभावे साध्ये स्पर्शवदन्यत्वादावतिव्याप्तिः॥ तादृशसाध्याभावसमुदायवति पृथिव्यादौ तस्या
वृत्तेः॥ किं च महाकालान्यत्वादिसाध्यके व्यभिचारिणि कालिकविशेषणताविशेषेण घटादि हे
तावतिव्याप्तिः॥ तादृशसमुदायवति महाकाले तेन संबंधेन वृत्तिमन्मात्रस्यैव वृत्तेः॥ एतेन सा
ध्यतावच्छेदकावच्छिन्नव्यापकतावच्छेदकरूपावच्छिन्नप्रतियोगिताकव्याप्यवृत्तिस्वसमानाधि
करणयावदभावाधिकरणवृत्तित्वाभावावृत्तिमद्वृत्तपोय्यावेतस्तद्वत्त्वं व्याप्तिः॥ केवलान्वयिनि
संयोगाद्यभावस्याभावाः संयोगादयो न व्याप्यवृत्तयः॥ एवं साध्यस्य गुणसामान्यस्याभावोऽ
व्यत्वाधिकरण उत्पत्तिकालावच्छेदेन वर्त्तमानोपि न व्याप्यवृत्तिः॥ उक्तरूपावच्छिन्नप्रतियोगि
ताकः क्वचिदप्रसिद्ध्यादिसेपादकः पुनरभावानां हेतुसमानाधिकरणौ उक्तसमुदायाधिकरण
वृत्तित्वतदभाववृत्तिमत्वानिरुक्तरीत्या प्रत्येतव्यानीत्यादिकमपास्तं॥ तद्विशिष्टेति॥ विशेष
णतावच्छेदकविशिष्टज्ञानस्य विशिष्टवैशिष्ट्यप्रत्ययहेतुत्वात्॥ अभावप्रत्ययोपघटत्वादिविशि ॥१२॥

ष्टस्य च घटादिः प्रतियोगित्वमवगाहमाने विशेषणस्यापि घटत्वादेस्तदवच्छेदकमेवगाहते न
तु स्वातंत्र्येण॥ घटो नास्तीत्येव प्रतीतेः॥ तदिहाभावप्रत्ययो यद्व्याधिकरणधर्मेण विशिष्टं प्रतियो
गिनं नावगाहते नावगाहत एव तदा तस्यापि प्रतियोगितावच्छेदकत्वं॥ अथावगाहेते तर्हि त्व
म एव न च ततोऽर्थसिद्धिरिति भावः॥ यदि पुनरानुभाविको लोकानां स्वरसवाही घटत्वेन पटो
नास्तीत्यादिप्रत्ययो न तदा तादृशाभावनिवारणं गीर्वाणगुरूणामपि शक्यमिति मंतव्यं॥ साध्येति॥
साध्यस्य सामानाधिकरण्यं येषु तेषामनधिकरणत्वे तदभाववत्वमिति यावत्॥ तस्मिंसतीति सा
ध्याधिकरणत्वे तदवच्छिन्नाधिकरणताकत्वं सति सत्त्वस्यावच्छेदकत्वं नाभावत्वा॥ तद्वोहान्यूनव
त्तित्वं॥ एवं च साध्यवद्वृत्तिसकलपदार्थाभाववत्वं यद् अधिकरणताया न्यूनवृत्तित्वमिति
फलितोर्थः॥ यथा सन्निवेशोऽप्यधिकरणत्वस्यानैवस्पर्थ्या॥ हेतुतावच्छेदकसंबंध ना नायवाततः॥
येन येन च संबंधेन यो यः साध्यवद्वृत्तिस्तेन तेन संबंधेन तत्तदभावो बोध्यः॥ एतेन साध्यवद्
वृत्तित्वं यदि साध्यतावच्छेदकसंबंधेन विवक्षितं तदा समवायेन साध्यतायां साध्यवदसमवे
तस्य सार्वत्रिकत्वात् सकलतत्त्वशून्याप्रसिद्धिः॥ अथ तदभावोपि तादृशैव संबंधेन वाच्यस्तदा

त्तिमान्प्रमेयत्वादित्यादावतिव्याप्तिः॥जातिमत्समवेतत्वाभावस्य समवायेनाभावस्यैकत्वान्न

त्वादत एव न संयोगेन समवायेन वा॥इदं न जातिमत् जातित्वात् इत्यादौ साध्यवत्समवेताप

प्रसिद्धेश्च॥नापि साध्यतावच्छेदकेन संबंधेन इदं एतद्रूपभिन्नं गुणत्वादित्यादावतिव्याप्तेः॥ना

पि विषयतया घटभिन्नं प्रमेयत्वादित्यत्रोप्यतिव्याप्तेः सविषयकमात्रस्यैव घटभिन्नविषयत्वात्

घटनिर्विकल्पकेपि घटत्वादिभानात्॥नापि संबंधमात्रेण द्रव्यं सत्त्वादित्यादावतिव्याप्तेः वृत्तिमन्मा

त्रस्यैव स्वरूपसंबंधेन महाकालवृत्तेरवृत्तेः भावस्य चकैवल्यान्वयित्वादिति प्रत्युक्तं॥विशेषणता वि

शेषेण वा साध्यवद्वृत्तित्ववक्तव्यं सर्वत्रैव तत्तन्निमित्तित्वे तत्तदन्यान्यत्वे तत्प्रकारकप्रमाविशेष्यत्वे वा त पयर्द

स्यानंतेन संबंधेन तदवच्छिन्नसामान्याभावो वाच्यः॥केचित्तु॥ननु व्यत्यासेनासाध्यानिसाध्यवि

रोधीनि साध्यासमानाधिकरणानीति यावत् तानि सामानाधिकरण्यनाधिकरण्यानियमस्य तत्त्वं॥ शिवः

योगि ३ साध्यसामानाधिकरण्याभावव्यापकाभावप्रतियोगिसामानाधिकरण्यसामान्यकत्वमिति फलितोर्थः॥

इयत्रचसाध्यसामानाधिकरण्यं साध्यतावच्छेदकसंबंधेन साध्यवत्तिहेतुतावच्छेदकसंबंधेनवृत्तिं

परंच सामानाधिकरण्यं हेतुतावच्छेदकसंबंधेन हेतुमति तेनैव वृत्तिः॥तेन समवायेन पृथिवीत्वा ॥१३॥

तु३

७

संयोगाभावे

दिः साध्यतायां व्यभिचारिणि कालिकसंबंधेन हेतौ द्रव्यत्वादेश्च समवायेन साध्यतायां समवायेन

हेतौ सत्त्वगुणत्वादौ नातिप्रसंगः॥न वा संयोगेन वृक्षादौ साध्ये समवायेन तद्व्याप्यस्वरूपविशेषा

देः कालिकसंबंधेन तदधिकरणे कालिका...परिमाणस्पंदत्वादेः समवायेन तदधिकरणे घ

गे टादेः संयोगेन वृत्तावपि चाप्रसंगः॥संबंधविशेषेण व्याप्यत्वं नाभावसाधिकरणत्वमिति प्राहुः॥

तच्चिंत्यम्॥यथाश्रुतं यथासंभवं विकल्प्य दूषयति॥नित्यादिना॥न त्वप्रतियोगिपदेन प्रतियोगितानव

च्छेदकावच्छिन्नत्वं वक्तव्यमत आह॥द्रव्यत्वादिरिति॥प्रतियोगिविरोधित्वं॥तदधिकरणवृत्तित्वं॥व्या प्रतियोगि

प्यवृत्तित्वस्य समानाधिकरणत्वं तदभावाप्रतियोगित्वं॥इत्याधिकरणेति॥तथा सत्यभाव एव न सि

घ५ ध्येदिति भावः॥संयोगोत्पत्ताभावस्य च द्रव्यप्रतियोगिसामानाधिकरण्ये व्याप्यवृत्तित्वं चैव प्रतियोग्य ३

त्वं धिकरणीभूत द्रव्यवृत्तिस्वाधिकरणीभूतद्रव्यनिष्ठात्यंताभावप्रतियोगित्वं॥गुणेन्च प्रतियोग्यसा

मानाधिकरण्यं व्याप्यवृत्तित्वं च प्रतियोग्यनधिकरणीभूतगुणवृत्तित्वं॥स्वाधिकरणीभूतगु

णनिष्ठात्यंताभावाप्रतियोगित्वं॥एतानि वचनभेदकानि॥इत्यविरोधात्॥सामान्यतश्चाव्याप्ते

तौ प्रतियोगिसमानाधिकरण्येन तथात्वव्यतिरेक इति भावः॥ननु साध्यवान्यस्येति साध्यवत्ति...

१ संयोगाधिकरणीभूतद्रव्यवृत्तित्वं संयोगानधिकरणीभूतगुणवृत्तित्वोभयस्याकथनाभावेसत्वाद्विरोधः॥संयोगाभावा...

२ द्रव्यनिष्ठाभावप्रतियोगित्वसंयोगानधिकरणीभूतगुणनिष्ठाभावप्रतियोगित्वोभयस्येत्वस्य गुणेत्वे सत्वाद्विरो...

धोऽन्वेष्टव्यः॥सचाधिकरणत्वं॥साध्यसाधनयोरपि समानाधिकरण्यमेवेत्यत्तो दूषणांतरमं
साध्येति॥साध्यत्वसाधनत्वव्याप्तिप्रतियोगित्वानुयोगित्वे॥यत्तद्रूपमेवव्याप्तिनिर्वर्तकव्याःतत्रूपा
वह्निमदिति॥ननुयत्समानाधिकरणान्योन्याभावप्रतियोतावच्छेदकंयद्रूपावछिन्नेनभवतितद्रूपाव
छिन्नेनसमंतस्यसामानाधिकरण्यंव्याप्तिरित्यर्थः॥नचधूमसमानाधिकरणान्योन्याभावप्रतियोगि
तावच्छेदकोवह्नित्वावछिन्नोवह्निर्धूमवान्वह्निमानित्यप्रतीतिरित्यतआह॥विशेषेति॥यएवप्रत्येकंच
ह्निमद्भेदाःधूमसमानाधिकरणास्तएवचएकाधिकरणवृत्तित्वावछिन्नावह्निमत्सामान्यभेदबुद्धिमुत्पा
दयंति॥तत्प्रतियोगितावच्छेदकोवह्नित्वावछिन्नोवह्निरितिभवत्यव्याप्तिः॥साधनेति॥वैय्याधिकरण्येत
दनाधिकरणवृत्तित्वे॥तच्चकेवलान्वयिनःसाधनस्याप्रसिद्धमतिप्रसंजकंचपृथिवीद्रव्यत्वादित्यादा
यतःसमानाधिकरणपदोपादानं॥धूमादेरपिनवह्न्यादिसमानाधिकरणद्रव्यत्वाघनाधिकरणवृत्ति शिवः
त्वमतोयावदिति॥यद्यपिपृथिवीत्वादिसमानाधिकरणघटत्वपटत्वाघनाधिकरणवृत्तित्वादेःतद
नाधिकरणमात्रवृत्तित्वंचनिखिलघटपटादिरूपाणां॥तथापितादृशधर्मानधिकरणमात्रवृत्ति ॥१४॥
त्वानवच्छेदकसाध्यतावच्छेदकवत्वंबोध्यं॥नहिपृथिवीत्वादिसमानाधिकरणस्तादृशःकश्चिद

त्वेऽव्या३

८

व्यधिकरण / साधन

१५

कोधर्मोयदनधिकरणमात्रवृत्तित्वावच्छेदकंरूपत्वादि॥धूमत्वादिकंतुवह्न्यादिसमानाधिकर
णयोगोलकत्वाघनाधिकरणमात्रवृत्तित्वावछेदकं॥तदवछेदकत्वंचतदनतिरिक्तवृत्तित्वं॥त
च्चतच्छून्यधर्मावृत्तित्वं॥तेनप्रमेयत्वसमानाधिकरणगुणत्वाघनधिकरणमात्रवृत्तित्वान
धिकरणगगनादिवृत्तित्वेपिद्रव्यत्वस्यद्रव्यसाध्यकमेयत्वेनातिप्रसंगः॥वस्तुतस्तु॥तादृशध
र्मानंकरणमात्रवृत्तिस्यावछिन्नाधिकरणताकत्वेतदवछेदकत्वंवाच्यं॥तेनसत्ताद्रव्यत्वोभय
वान्गुणान्यत्वविशिष्टसत्तावान्वाजातिमत्त्वादित्यत्रनातिप्रसंगः॥सत्तायाःगुणत्वाभावव
न्मात्रवृत्तित्वविरहेपिउभयत्वाधिकरणतायागुणत्वाभाववन्मात्रवृत्तित्वात्॥मेयत्वादेरिति॥
ननुव्यतिरेकित्वेनधर्मोविशेषणीयः॥वस्तुतस्तु॥यावत्पदंतादृशस्यकस्यापिनवैय्याधिक
रण्यावछेदकमेवतावन्मात्रस्यैवारणायतथाचसाधनसमानाधिकरणधर्मनिरूपितवै
य्याधिकरण्यावछेदकरूपघसद्भिन्नधर्मवत्ता॥यावत्तादृशावछेदकत्वशून्यधर्मवत्तावासामा
नाधिकरण्यमितिपर्यवसितोदोषांतरमाह॥महानसादाविति॥तथाचतदनधिकरणत्वंत
भावाधिकरणत्वंतद्भिन्नत्वंवाद्वयमपिदुष्टमित्यर्थः॥एतेननदधिकरणवृत्तिमत्रवैय्या

अनौपाधिकत्वविशिष्टसाध्यसमानाधिकरणावाधिष्टयत्साध्यभावाधिकरणवृत्ति...

एषमितिनिरस्तं॥समवायितया महानसे वृत्तित्वं वह्नौ नास्तीत्यादिप्रतीत्या वह्न्यादेरपि
रावैय्यधिकरण्या[illegible]धिकरणत्वात्संबंधविशेषिणैवैय्यधिकरण्यविवक्षायां नोक्तदोषइति
यं॥उपाधि[illegible]पदस्यसाध्यसमव्याप्तवचनतया ऽत्माश्रयप्रसंगात् ऽपाह॥साध्यव्यापक
त्वइत्यादि॥व्याप्तेनिरूपकत्वंव्यापकत्वेऽप्यात्माश्रयादिग्रस्तमत ऽपाह॥तद्वन्निष्ठेति॥यत्रोपाधि
रव्या[illegible]प्यवृत्तिर्नानाव्यक्तिकोवा तत्रापिव्याप्यवृत्तिरखंडश्चांततस्तद्भिन्न[illegible]त्वप्रका[illegible]रकप्रमावि
शेष्यत्वाभावादिरेवा[illegible]स्ति॥यदिचतस्यापिविशेषणंतरविशिष्टस्याधित्वावछिन्नस्यवातत्रा
भावसंभवस्तदासाध्यसमानाधिकरणात्यंताभावप्रतियोगितानवछेदकीभूतसाधनसमा
नाधिकरणात्यंताभावप्रतियोगितावछेदकधर्मवत्वं(तद्वपार्थः॥ऽपनवस्थांनिरसितुमाह॥
प्रतियोगित्वमिति॥सहेति॥एकदेशका[illegible]ावछेदनेतिपूरणीयं॥तेननाव्याप्यवृत्तेरभावस्यप्राग
भावादेश्चप्रतियोगितायामव्याप्तिः॥अन्योन्येति॥ऽपत्रसमवायादिसंबंधावछिन्नप्रतियोगिताका ॥शिवः॥
भाववतिमहानसादौसंयोगेनवह्न्यादेर्वृत्तेः॥येनसंबंधेनास्तद्वतितेनावृत्तिर्वक्तव्या॥इत्थंचतेन
संबंधेनासंबंधत्वोक्तौनायंदोषः॥अन्योन्याभावस्यतादात्म्यसंबंधावछिन्नप्रतियोगिताकत्व ॥१५॥

भावर

६

यातद्वतितेन[illegible]संबंधेनप्रतियोगिनोऽसंबद्धत्वात्॥परंतुसत्तायाःसमवायेनाभावस्यप्रति
गितायामव्याप्तिः॥तद्वतिसमवायेनवृत्तेरप्रसिद्धेःतादृशास्वसंबं[illegible]द्धाधिकरणावृत्तितत्कत्वाभिधा
नेचव्यधिकरणसंबंधावछिन्नाभावप्रतियोगितायामव्याप्तेः॥सिद्धांतलक्षणवक्ष्यमाणरीत्याच
खंडशःप्रसिद्ध्यातत्परिहारोपीतिध्येयं॥ऽपभावविरहात्मत्वमिति॥नचान्योन्याभावप्रतियोगि
तत्वावछेदकयोरप्रसक्त्यतिप्रसक्ती॥प्रकृतोपयोगिप्रतियोगितामात्रस्यलक्ष्यत्वेतुलक्षणे
ऽत्यंतपदवैयर्थ्यं॥सर्वत्रानित्यस्यनित्यसाधारणरूपावछिन्नस्यवाउपाधेलासंभवात्॥ऽतरथा
तुभेदप्रतियोगितावारणायसंसर्गाभावपरतयातस्यसार्थकत्वादितिवाच्यं॥विरहपदस्यतत्त
ज्ञानप्रतिबंधकज्ञानविषयार्थकत्वात्॥प्रतिबध्यातिहितादात्म्येनप्रतियोगिज्ञानमन्योन्याभा
वबुद्धिं॥प्रतिबंधकत्वंचात्रैककालावछेदेनैकत्रावर्त्तमानत्वं॥ऽपभावपदस्यचस्वाभावपरत्वात्॥
वस्तुतस्त्वेकसंबंधेनावछिन्नायास्तत्समानाधिकरणाभावप्रतियोगितायाऽपनवछेदकमपिभि
वत्येवसंबंधांतरावछिन्नायास्तस्याऽवछेदकमतोयत्संबंधावछिन्नायाःसाध्यसमानाधिक
रणाभावप्रतियोगितायाऽपनवछेदकंतत्संबंधावछिन्नायाएवसाधनसमानाधिकरणाभा

वप्रतियोगितायाऽवच्छेदकंतद्वाच्यं॥तथाचसंसर्गाभावत्वमनुपादेयमेव॥वाशब्दोऽस्वरसूचनः
सचव्यधिकरणसंबंधेनसर्वस्यप्रतियोगिनःतादृशात्यन्ताभावात्॥स्वाभावसंबंधित्वस्यस्वा
भावज्ञानविषयत्वस्यवाउभयोःसर्वत्रसंभवात्॥स्वाभावेत्यादौषष्ठ्यर्थप्रतियोगितायाःप्रवेशात्तत्र
स्वरूपसंबंधस्यैवशरणीकरणीयतयातस्यैवावश्यकतयातथात्वौचित्यात्॥अभावत्वप्रतिबंधक
त्वयोःप्रतियोगिताघटितत्वात्॥तथाविधव्यवहारगोचरत्वस्यापिविनाप्रतियोगितांनिर्वक्तुमशक्यत्वा
द्यात्॥यत्साध्यस्य॥यत्समानाधिकरणसाध्यस्य॥तथाहीत्यादि॥यत्समानाधिकरणात्यंताभावप्रति
योगितावच्छेदकंयावत्साध्यसमानाधिकरणात्यंताभावप्रतियोगितावच्छेदकं॥साध्यसमानाधिकर
णात्यंताभावप्रतियोगितानवच्छेदकंवायावद्यत्समानाधिकरणात्यंताभावप्रतियोगितानवच्छेदकं
तत्वमित्यर्थेनोक्तदोषइतिध्येयं॥प्रतियोगितयोश्चैकसंबंधावच्छिन्नत्वविशेषणताविशेषावच्छिन्न
त्वेवावक्तव्यं॥तेनप्रतियोगितावच्छेदकमात्रस्यैवयत्किंचित्संबंधावच्छिन्नसाध्यसमानाधिकरणाभा
वप्रतियोगितावच्छेदकत्वेपि॥एकसंबंधावच्छिन्नसाध्यसमानाधिकरणाभावप्रतियोगितानवच्छेदकस्य
संबंधांतरावच्छिन्नसाधनसमानाधिकरणाभावप्रतियोगितावच्छेदकत्वेपिनक्षतिः॥व्यभिचारिणि

॥१९॥

१०

तुयत्राधिकरणेव्यभिचारोविशेषणताविशेषावच्छिन्नतन्निष्ठाभावप्रतियोगितावच्छेदकं
साध्यवत्वप्रकारकप्रमाविशेष्यत्वंविशेषणताविशेषावच्छिन्नसाध्यसमानाधिकरणाभा
वप्रतियोगितानवच्छेदकमितिनातिप्रसंगइति॥वस्तुतोहेतुसमानाधिकरणान्योन्य
भावप्रतियोगितावच्छेदकंयावद्यद्धर्मावच्छिन्नसमानाधिकरणान्योन्याभावप्रतियोगिता
वच्छेदकंतद्धर्मावच्छिन्नसामानाधिकरण्यं॥साध्यसमानाधिकरणान्योन्याभावप्रतियोगि
तानवच्छेदकंयावद्यत्समानाधिकरणान्योन्याभावप्रतियोगितानवच्छेदकंतत्त्वंवाव्याप्तिरि
तिध्येयं॥साध्यमिति॥यावतां॥तेषामित्यर्थः॥दूषितंकेवलान्वयिनिअव्याप्त्या॥साचपर्ये
त्तलक्षणेपि॥गौरवंपरमतिरिच्यतइति॥कार्त्स्न्ये॥साधनस्यसाध्यस्यसाध्याश्रयस्यसा
ध्यसमानाधिकरणस्यसाधनाश्रयस्यसाधनसमानाधिकरणस्यवा॥अपाद्येकृत्स्नसा
धनसामानाधिकरण्यंसाध्ये॥कृत्स्नेषुसाधनेषुसाध्यसामानाधिकरण्यंवार्थः॥प्रथमे॥
एकेति॥नानेतिच॥व्याप्तिश्चाहेतुवृत्तित्वं॥पृथिवीपृथिवीत्वव्यापकजातेरित्यादावतिव्याप्ति
श्च॥अतएवनेतरः॥अर्थाभिधानपूर्वकंद्वितीयंनिरस्यति॥अतएवेति॥अतएव॥एकव्यक्ति

साध्यकाव्याप्तेरेव॥ विषमव्याप्तेः॥ समव्याप्तेरपि च संख्यापरिमाणादावैकत्वसाध्यकेन सकलस
ध्यसंबंधस्याभावात्॥ भावाच्चेत्यत्र बद्‌वान्‌द्रव्यत्त्वादित्यादौ॥ तृतीये साध्याश्रयपावद्वृत्तित्वाच
तुर्थे च साध्यसमानाधिकरणयावत्सामानाधिकरण्यमर्थः॥ तत्र च यथासंभवमेकमात्रवृत्ति
साध्यकेवृक्षादौ साध्ये धूमादौ चाव्याप्तिः॥ अपतिव्याप्तिश्च सत्त्वादौ॥ अर्थपरिष्कारपूर्वकं पंच
मं निरस्यति॥ न चेति॥ एकमात्रवृत्तिके साध्ये न चाव्याप्तिः॥ तथैव षष्ठं निरस्यति॥ नापीति॥ साध्या
नां सर्वेषां महानसत्वादीनां प्रत्येकं निरूपितान्यपि सामानाधिकरण्यानि न कुत्रापि वह्नौ॥ अथ यद्
द्धर्मावच्छिन्नसामानाधिकरण्यत्वेन साधनसामानाधिकरण्यव्यापकत्वं तद्धर्मावच्छिन्नसामाना॥ र
धिकरण्यं विवक्षितमिति चेन्न॥ इतोपि लघुतया साधनव्यापकतावच्छेदकरूपावच्छिन्नसामाना शिवः
धिकरण्यमेव व्याप्तिरिति सिद्धांतयिष्य तदिति॥ अपविनेति॥ साध्यं विना साध्याभाववति यो भा
वो वृत्तिस्तद्विरहः॥ साध्यं विनाऽभावः साध्याभावव्यापकीभूताभावप्रतियोगित्वमिति वा॥ अथेति
संबंध॥ सामानाधिकरण्यं॥ व्यभिचारिणि संबंधस्य केनचित् किंचिद्रूपावच्छिन्नेन॥ धूमादेरपि ॥२७॥
द्रव्यत्वादिना वह्निव्यापकत्वात्॥ तद्व्याप्यदिति॥ न च व्यभिचाराग्रहसहकृतस्तथाविधस्तथा॥ व्य

२२

व्यापकं

अप्रामाण्यसामानाधिकरण्यं

नवीनं

नुमितौ

भिचारतद्व्यतिरेकयोरनुपस्थितावपि सामानाधिकरण्यधर्मवत्ताज्ञानमात्रादनुमित्यनुत्पाद
स्य सर्वानुभवसिद्धत्वात्॥ हेत्वंतरे तत्रैव च स्वरूपांतरेण व्यभिचारग्रहे हेतुतावच्छेदकाग्रहेप्यनुमि
तेरुत्पादाच्च॥ विवक्षिते च सामानाधिकरण्यज्ञानस्यैव हेतुतायां॥ व्यभिचारज्ञानाभावकारणता
मपेक्ष्य च कारणीभूतसामानाधिकरण्यज्ञाने लाघवेनाव्यभिचारस्य विषयतयावच्छेदकत्वमुचि
तं॥ न चाव्यभिचारसंशयेनुमित्यनुदयाद्व्यभिचारनिश्चयत्वेन कारणत्वे तत्र गौरवं॥ व्यभिचा
अव्यभिचार रज्ञानस्य भ्रमत्वनिश्चयदशायामेवाविरोधितया भ्रमत्वेनानिश्चीयमानस्याविरोधित्वे च वा तस्य
वक्तव्यं भावः च्यं॥ अपव्यभिचारनिश्चयस्य च भ्रमत्वशंकायामपि अनुमित्यजनकतया भ्रमत्वेनाग्रह्यमाण
स्यैव हेतुत्वमिति तत्रैव गौरवात् नानाविधव्यभिचारज्ञानाभावानां नियतपूर्ववृत्तित्वेन कृप्तान
मपि हेतुत्वमपेक्ष्य वक्ष्यमाणैकविधाव्यभिचारज्ञानस्यैव हेतुत्वं युक्तमित्याहुः॥ सामानाधिकर
ण्यविशिष्टपक्षधर्मत्वं तु पक्षे साध्यग्रहं विना दुर्ग्रहमिति॥ केवलान्वयित्वस्याग्रहे सामानाधिक
रण्यमात्रग्रहादनुमित्यनुत्पत्तेस्तत्परिहावाच्यः॥ तद्वद्वृत्तिमदत्यंताभावाप्रतियोगित्वादिकं॥ अ
न्याभावप्रतियोगितानवच्छेदकत्वं वा॥ तथा च सर्वसाधारण्याय लाघवात् साधनवतस्तद्वृ

॥प्रतियोग्यसमानाधिकरणेति॥

स्यवावृत्तेरन्योन्याभावस्यवाविशेषणत्वमनुचितमिति॥सिद्धांतरहस्यंशेषंकेवलान्वयिग्रंथेकलस
वक्ष्यामः॥ ॥प्रतियोग्यसमानाधिकरणयद्रूपविशिष्टसमानाधिकरणात्यंताभावप्रतियो-
२न गितानवच्छेदकोयोधर्मस्तद्धर्मावच्छिन्नेनयेनकेनापिसमंसामानाधिकरण्यंतद्रूपविशिष्टस्य ति
तद्धर्मावच्छिन्नयावन्निरूपिताव्याप्तिरित्यर्थः॥इदंचादौसाध्येपरंपरासंबंधेनदंडत्वादिकमेवसा- च
ध्यतावच्छेदकमतोनाव्याप्तिः॥इत्थंचेदंद्रव्यंगुणकर्मान्यत्वेसतिसत्त्वादित्यादौसत्त्वाद्यधि- या
करणगुणादिनिष्ठात्यंताभावप्रतियोगित्वेपिद्रव्यत्वादेर्नाव्याप्तिः॥साधनस्यविशिष्टसत्त्वादेर्गु-
णादावृत्तेः॥सामानाधिकरण्यव्यक्तीनांभेदेपिनिरूपकतावच्छेदकस्याधिकरणतावच्छेदक-
स्यचैक्यादव्याप्तेरैक्यं॥वस्तुतस्तु॥धूमत्वविशिष्टव्यापकवह्निसामानाधिकरण्यस्यपरासमनादि
धूमत्वा४ साधारणत्वादिमतितादृशसामानाधिकरण्यंतद्वतिधूमत्वादिकंव्याप्तिः॥अप्राधान्याद्वृत्ती- शिवः
यात्वभिन्नेतिध्येयं॥अयं[illegible]कपिसंयोगीएतद्वृक्षत्वात्इत्यादिसंग्रहायासमानाधिकरणांतं सामानाधिकरणा
यत्तुइदंसंयोगीद्रव्यत्वादित्यत्राव्याप्तिवारणायतत्॥संयोगस्यशाखावच्छेदेनवृत्तेर्वृक्षत्वादिनं ॥१८॥
संयोगसामान्याभाववत्तौविरोधाभावात्तत्रचातींद्रियसंयोगस्यापिसत्त्वात्॥परितःप्रतियो-

धी२

वच्छे२

१२

ति

ग्यनुपलब्धेरेषावृक्षेनसंयोगइत्यादिनाध्यक्षमिति॥तन्न॥द्रव्येसंयोगसामान्याभावेमानाभा-
वात्॥नचयोयद्यावद्विशेषाभाववान्सतत्सामान्याभाववानितिव्याप्तेर्यावत्संयोगाभाव
एवमानंपक्षेरपियोरनुनगमात्॥एकावच्छेदेनयावद्विशेषाभाववत्त्वस्योपाधित्वाच्च॥एतेनायं
४ संयोगसामान्याभाववान्यावद्विशेषाभाववत्त्वादितिपरास्तं॥व्यर्थविशेषणत्वात्॥अप्रयोजक- मततोघा१८वि
त्वात्॥निर्गुणत्वादेरूपाधित्वाच्च॥नचप्रतियोग्यनवच्छेदकतयैववृक्षत्वादेरभावावच्छेदकत्वे शेषव्याप्तिः
गुणाद्यनवच्छेदकप्रमेयत्वादेस्तदभावावच्छेदकत्वप्रसंगात्॥यथाचघटपूर्ववर्तित्वस्यप्रतिदंड-
वह्निसामानाधिकरण्यस्यवाप्रतिधूमंभिन्नत्वेपिदंडत्वंधूमत्वेनतत्सामान्यस्यावच्छेदकंतथासंयो-
गसामान्यस्यावच्छेदकंद्रव्यत्वादीत्यस्यापिसुवचत्वाच्चेतिसंप्रदायः॥नवीनाःपुनरुत्पत्तिकालावच्छे-
देनघटादौगुणस्यप्रत्यावच्छेदेनगगनादौसंयोगसामान्याभावोवर्ततेतथाधूमवत्यपिविरहोदहनस्य
दहनपर्वतेनितंबेहुताशनोनशिखरेइतिप्रतीतेःसंयोगेनेवव्यस्याव्याप्यवृत्तित्वात्॥वृत्तेरव्याप्यवृ-
त्तित्वेवृत्तिमतोव्याप्यवृत्तित्वस्यासंभावितत्वात्॥एवंप्रतियोगिमतोरपिकालदेशयोर्दैशि-
कनेदावच्छेदेनतदभावः॥तथाचतत्तत्साध्यकाव्याप्तिवारणायतत्॥नोपादेयंचसर्वथैव

प्यवृत्तिसाध्यकेसाध्यभेदेनव्याप्तिभेदादितिवदंति॥प्रतियोग्यसामानाधिकरण्यंचप्रतियोग्य
वच्छेदकावच्छिन्नासामानाधिकरण्यं॥तेनापंगुणकर्मान्यत्वविशिष्टसत्तावान्जातिमत्त्वात्
मूर्तत्वमूर्तत्वोभयवान्मूर्तत्वादित्यादौनातिप्रसंगः॥नचोभयत्वमेकविशिष्टापरत्वंवि
शिष्टंचकैवल्यादन्यदिति।तदभावोमनसिसहजतएवप्रतियोगिव्यधिकरणइतिवाच्यं॥तदुभ
यत्वंहिनविशिष्टत्वादनतिरिक्तंनवातदवच्छिन्नाभावस्तदवच्छिन्नाभावात्।विशिष्टविरह
पिघटत्वपटत्वोभयत्वेनतदभावस्यचप्रत्यक्षसिद्धत्वात्॥नचतत्रव्याप्तिरेवउभयत्वाधिक
रणस्यमूर्तत्वस्यमनसिसत्वात्।इतिवाच्यं॥तथा[illegible]त्वेप्युभयत्वेनरूपेणतत्रासत्वात्॥
नात्रोभयमितिप्रतीतेर्दुर्वारत्वात्॥अत्यंतपदमत्यंताभाववत्त्वनिरूपकप्रतियोग्यसामानाधि
करण्यस्यात्यंताभावत्वनिरूपकप्रतियोगितापार्श्वलाभाय॥अन्यथासर्वस्यैवाभावस्यस्वस
मानाधिकरणाभावांतरभिन्नत्वात्तद्भेदस्यचस्वरूपेनतिरिक्तत्वात्तयाप्रतियोग्यसमानाधिकर
णस्यैवदुर्लभत्वापत्तेः॥सर्वेषामेवाभावानांहेतुसमानाधिकरणात्यंताभावत्वनिरूपकप्रतियोग्य
समानाधिकरणात्यंताभावांतरात्मकत्वेनेदस्यप्रतियोगित्वाद्भावसाध्यकाव्याप्तिश्चेतिसंप्रद

पटत्वाभावः३ गोत्वाभावः१ साध्यभेदः१

मनसं — पत्वस्यो — पा३ ए२ — मनसि — अनुयोगिक — शिवः — ॥२९॥ — २२

हेत्वधिकरण

यः॥अथयदागोत्वंतदागौरित्यत्रातिव्याप्तिः॥प्रलयस्यगोध्वंसवत्त्वेनगवात्यंताभावानधि
करणत्वात्॥संसर्गाभावमात्रोक्तावपियदास्पंदस्तदाद्व्यणुकंयदाऽदृष्टंतदाजन्यंज्ञानंदुःखंवा
[illegible]यदाभस्यादृष्टंतदातदीयंज्ञानमित्यादावतिव्याप्तिः॥द्व्यणुकत्वादिद्व्यणुकादिशून्यखंडप्र
लय निष्ठध्वंसप्रागभावप्रतियोगितानवच्छेदकत्वात्॥न[illegible]तयोःसामान्याभावत्वमेतपिएक
विशेषप्रागभावविशेषांतरध्वंसवत्यपिसमयेसामान्यावच्छिन्नध्वंसप्रागभावयोःसंभव[illegible]तिचे
न्न॥प्रतियोगिमतद्ध्वंसादिमतोपिकालस्यात्यंताभाववत्त्वेविरोधाभावात्॥अन्यथात्यंताभा
वस्यकालमात्रावृत्तित्वप्रसंगात्॥इयांस्तुविशेषःयदेकस्यदेशाभेदावच्छिन्नंतथात्वमपरस्य
तुस्वरूपावच्छिन्नमितिदेशेकालस्यैवकालेदेशस्याप्यवच्छेदकत्वात्॥तदन्येचकालेतदभा
वस्यप्रतियोगिव्यधिकरणत्वात्॥नचसंसर्गाभावविशेषोत्यंताभावः॥संसर्गाभा[illegible]
[illegible]वत्त्वंचसंसर्गारोपजन्यप्रतीतिविषयाभावत्वरूपंजन्यताघटकनियमघटितमितिवा
च्यं॥तद्धटन्यावृत्तित्वरूपनियमस्यतत्रघटकत्वात्॥एवंनियमांतरस्यात्रप्रवेशेपिनक्षतिरि
त्याहुः॥वक्ष्यतेचनियमाघटितमेवसंसर्गाभावादिलक्षणं॥अनुपदमेवविवेचयिष्य[illegible]ते

ध्वंसप्रागभाववं — हि ३

अनन्यथासिद्धनियतपूर्व[illegible]

॥२०॥ सर्गाभाववत्त्वप्रवेशप्रयोजनविरहोऽव्याप्तिश्च॥ अयं ज्ञानवान्द्रव्यत्वात् विशेषगुणवान्मनोन्यस
व्यत्वात् जातिमान् भावत्वात् इत्यादौ समवायेन ज्ञानादेः साध्यतायामतिव्याप्तिः॥ साध्यशून्यानाम
पि हेतुमत्तो विषयत्वविशेषणतैकार्थसमवायैः साध्यवत्त्वात्॥ मैवम्॥ प्रतियोगितावच्छेदकसंबंधे
न प्रतियोगिनो यदधिकरणं संबंधिवा तद्वृत्तित्वाभावस्योक्तत्वात् नवति चैवमन्योन्याभावोपि प्रति
योग्यसमानाधिकरणः॥ तद्विशिष्टस्य च हेत्वधिकरणवृत्तित्वं वाच्यं॥ तेन नाव्याप्यवृत्तिसाध्यका
वृत्ति दि संग्रहः॥ तद्वृत्तिभिन्नत्वं तु नार्थः॥ अव्याप्येऽसौ ध्वंसे व्यभिचारिण्यतिप्रसंगात्॥ अत्र च सामाना
धिकरण्यवतो न तदभाववत्त्वं प्रतीतेरन्यथैवोपपादितत्वादित्यस्वरसात् प्रतियोगिवैयधिकरण्यमि
त्यादि विशेषणं वक्ष्यति॥ तत्र हेत्वधिकरणे बोध्यं॥ प्रतियोग्यनधिकरणी भूत हेत्वधिकरणवृत्त्य
भावेति पुनरभावोतार्थनिष्कर्षः॥ ननु प्रतियोगितावच्छेदकावच्छिन्नस्य यस्य कस्यचित् तत्सामान्यस्य ॥शिवः॥
वा प्रतियोगितावच्छेदकयत्किंचिदवच्छिन्नस्य वानधिकरणमुक्तं॥ आद्येऽव्याप्यवृत्तिसाध्यकाव्या
प्तिः॥ एकप्रतियोग्यधिकरणस्यापि तद्व्यक्त्यन्तरानधिकरणत्वात्॥ द्वितीये संयोगसामान्याभावव ॥२६॥
न्द्रव्यत्वाभाववान्वा सत्त्वादित्यादावतिव्याप्तिः॥ साध्याभाववतो द्रव्यस्य तत्प्रतियोगिसंयोगविशे

२८

षाभाववत्त्वात्॥ नित्यत्वादिविशिष्टद्रव्यत्वाभावात्मकप्रतियोगिनोऽधिकरणत्वाच्च॥ सर्वाभावाभा
दि वात्मकस्य नित्यत्वाविशिष्टद्रव्यत्वस्य द्रव्यत्वानतिरेकात्॥ तृतीये कपिसंयोगाभाववानात्मत्वा
दित्यादावव्याप्तिः साध्याभावानां कपिसंयोगानां गुणानामधिकरणस्यात्मनस्तत्प्रतियोगिता
वच्छेदकगुणसामान्याभाववत्त्वावच्छिन्नाधिकरणत्वात्॥ मैवम्॥ यादृशप्रतियोगितावच्छे
दकावच्छिन्नानधिकरणत्वं हेतुमतस्तदनवच्छेदकत्वस्योक्तत्वात्॥ अत्र च व्याप्य [illegible]
व्यसामानाधिकरण्ये हेतौ यादृशः संबंधः प्रविष्टस्तेन संबंधेन यो हेतुमान् तत्र वर्त्तमानत्वमभा
वस्य॥ साध्यस्य यादृशः संबंधस्तत्संबंधावच्छिन्नायाश्च प्रतियोगिताया अनवच्छेदकत्वं बोध्यं
तेन धूमसमवायिनिष्ठाभावस्य संयोगावच्छिन्नाभावप्रतियोगिताया धूमसंयोगिनिष्ठाभावस्य
च समवायावच्छिन्नप्रतियोगिताया अनवच्छेदकत्वेपि च वह्नित्वस्य न क्षतिः॥ यद्रूपसाध्यतावच्छेदक
संबंधेन प्रतियोग्यसंबंधित्वं हेतुमतो वक्तव्यं तु यावत् संबंधेन प्रतियोगितानविशेषणीया॥ ए
वं स्थिते सामानाधिकरण्यदोषसंबंधित्वं नवेशयेनी॥ न त्वधिकरणत्वं॥ तथा च धर्मिणोपि व्याप्यत्वे
व्यापकत्वं च निर्वहति॥ तथा हि॥ तादात्म्येन संबंधेन धूमवतः संबंधिनि महासे नैव वर्त्तमानो योन्योन्याभावः

तस्य हेतोस्तथावच्छिन्ना[?]याप्रतियोगिता तदनवच्छेदक[?] वह्निमत्त्वावच्छिन्नस्य वह्निमतस्ता
दात्म्येन संबंधिनि महानसे धूमवतस्तादात्म्येन संबंधित्वं॥ एवं धर्मिणो धर्मव्याप्यत्वव्यापकत्वे
बोध्ये॥ अत एव जलादीनां पृथिवीत्वाभावव्याप्यत्वं तत्र तत्रोक्तं संगच्छते॥ यथा च याद्दशेन संबं
धेन हेतौ व्याप्यता गृहीता ताद्दशेनैव तस्य पक्षविशिष्टज्ञानं याद्दशेन च साध्यस्य व्यापकत्वमव
गतं ताद्दशेनैव साध्यपक्षयोर्विशिष्टानुमितिः॥ तेन न संयोगेन धूमावयवेन वा समवायेन पर्व
ते वह्निधीः॥ तथैवावगतव्यापकताघटकसंबंधेन व्यापकस्याभावग्रहे गृहीतव्याप्यताघटक
संबंधेन व्याप्यस्याभावः सिद्ध्यति॥ कथमन्यथा समवायेन वह्निविरहिणि महानसे संयोगेन संयोगेन
वा वह्निविरहिणि स्वावयवे धूमः समवायेन न निवर्त्तेत॥ निवर्त्तते च संयोगेन वह्निविरहिणि स्वा
वयवे संयोगेनेति नियममुपपद्यते॥ तथा च तादात्म्येन संबंधेन जलादीनां व्याप्यत्वग्रहाद्व्याप शिवः
कनिवृत्त्या तादात्म्येनैव तेषामभावः सिध्यति स एव चान्योन्याभावः॥ इत्थमेव च तादात्म्याद्द
त्तशिशुपयोर्व्याप्तिनिश्चय इति संगच्छते॥ अत एव गोत्वत्वाद्यग्रहदशायां पत्रसास्नादिसा गो
रिति तादात्म्येन गोर्व्यापकत्वग्रहे सास्नादिना तादात्म्येन गोः प्र तादात्म्येन गोव्यतिरेकाच्चेत्सास्ना ॥२१॥

स्व

च धि

दिव्यतिरेकश्च सिध्यति॥ एवं संयोगेन गगनादेरपि द्रव्यत्वव्याप्यत्वं॥ वृत्त्यनियामकसंयोग
मात्रस्याभावप्रतियोगितावच्छेदकसंबंधरूपत्वे साध्यतावच्छेदकसंबंधेन प्रतियोग्यसंबंधित्व
भिधाने वा पृथिवीत्वादिव्यापकत्वमपि तदभाववतोपि पृथिव्यादेः संयोगेन तत्संबंधित्वात्सि
द्धिरपि तस्य तथैव न तु वृत्तिनियामकसंबंधेन॥ तेनासंबंद्धत्वादव्यापकत्वाच्च॥ व्यक्तीभविष्य
ति चैतदुपरिष्टात्॥ नन्वष्टद्रव्यातिरिक्तद्रव्यात्मककालमात्रवृत्तिधर्मस्य विशेषणताविशेषे
ण व्याप्यवृत्तिकिमपि व्यापकं न स्यात्॥ स्व[illegible]वच्छेदकसंबंधेन प्रतियोगिनो संबंधिनि काले व
र्तमानस्याभावस्य प्रतियोगितायां तत्संबंधावच्छिन्नत्वस्य तेन संबंधेन यत्प्रतियोगिसंबंधितद
न्यत्वस्य च कालेऽसंभवात्॥ न च ताद्दशसंबंधेनाधिकरणीभूतयत्किंचिद्वृत्तेरवृत्तिप्रति
योगितावच्छेदकविशिष्टप्रतियोगिसामान्यकत्वं वाच्यं॥ तथा चावृत्तिगगनाद्यभावद्वारिके
व प्रसिद्धिः॥ सत्ताद्यधिकरणकर्मादौ समवायेन ज्ञानसामान्यस्य संयोगसामान्यस्य चावृत्तेर्नातिप्र
संगः॥ मूर्तत्वमूर्तत्वोभयत्वविशिष्टगुणकर्मान्यत्वविशिष्टसत्तात्वविशिष्टादिकं च न मनो गुणा
च वृत्तिसंयोगाभसामान्ये तु न किंचित्तद्व्यावृत्तीति वाच्यं॥ विशिष्टस्यानतिरिक्तत्वात्॥ समवायेन

साध्यत्वेमेयत्वादावतिव्याप्तिः॥जातिमन्निष्ठतादृशाभावप्रतियोगितायाजातित्वेनानवच्छेदात्॥अन्य
शून्येचतादृशसंबंधेनवृत्तेरप्रसिद्धिः॥संयोगादिसाध्य[illegible]कगुणकर्मान्यत्वादौचातिव्याप्तिः॥अ
व्येहेतुमतितादृशसंबंधेनवृत्तेरप्रसिद्धत्वात्॥रव्येसंयोगादेरपिचवृत्तेः॥मैवम्॥साध्यता
वच्छेदकसंबंधसामान्योनिरूक्तप्रतियोगिकत्वेहेत्वधिकरणीभूतयत्किंचिद्व्यक्त्यनुयोगिक
त्वसामान्योभयाभावस्यविवक्षितत्वात्॥धूमसंयोगेवह्न्यधिकरणायोगोलकानुयोगिक
त्वस्यचैत्रान्यत्वविशिष्टेतद्दंडसंयोगेतद्दंडाधिकरणचैत्रानुयोगिकत्वस्यगुणकर्मान्यत्व
विशिष्टसत्तासमवायेचजात्यधिकरणगुणकर्मानुयोगिकत्वस्यविरहान्नातिप्रसंगः॥स्व
रूपसंबंधेनगगनादिवृत्तिमत्वेतुनिरूक्तप्रतियोग्यनधिकरणहेत्वन्निष्ठाभावप्रतियोगित
सामान्येयत्संबंधावच्छिन्नत्व[illegible]द्धर्मावच्छिन्नत्वोभयाभावस्तेनसंबंधेनतद्ध
र्मावच्छिन्नस्यव्यापकत्वंवाच्यं॥समवायसंबंधेनमेयसामान्यांसामान्यादौसत्वात्प्रमेयत्वा
देरपिअभावप्रतियोगितावच्छेदकत्वंसुलभं॥अतएवसमवायस्यैकत्वेनद्रव्यत्वादिप्रति
योगित्वगुणानुयोगित्वोभयावत्त्वेपिद्रव्यंजातेरित्यादौवह्निधूमोभयवान्वह्नेरित्यादौसंपे

प्र

शिवः
भावस्य
॥२२॥

स्वव्यापकतत्वे

गस्यवह्नित्वावच्छिन्नप्रतियोगिकत्वविरहेपिचनातिव्याप्तिरित्यपिवदंति॥प्रतियोगित्वादिश्च
वच्चविशेषोनसंबंधत्वेननिविष्टः॥सामानाधिकरण्येपिसंबंधःसंयोगत्वादिनैवनिवेश्यते॥
दर्शितंचनियमाघटितमपिसंबंधत्वं॥अभावत्वंचेदमिहनास्तिइदमिदंनभवतीतिप्रती
तिनियामकोभावाभावसाधारणःस्वरूपसंबंधविशेषः॥अतोनाभावसाध्यकव्यभिचारि
ण्यतिव्याप्तिप्रसंगः॥तदपिवानोपादेयंप्रज्ञेयोनविरहात्॥विषयतातत्त्वादिवत्प्रतियोगित्वा
धिकरणत्वसंबंधत्वात्तादात्म्यातिरिक्ताएवपदार्थाइत्यप्येकदेशिनः॥नन्ववच्छेदकत्वमिह
नस्वरूपसंबंधविशेषः।संभवतिलघौधर्मेगुरौतदभावात्॥प्रमेयधूमत्वकंबुग्रीवादिम
त्वघ्राणग्राह्यगुणत्वादेरतथात्वेनतेनरूपेणसाध्यतायांव्यभिचारिण्यतिप्रसंगात्॥न
प्यनतिरिक्तवृत्तित्वं॥प्रतियोगितायाःस्वरूपसंबंधात्मिकायाःप्रतिव्यक्तिभिन्नत्वेनधूम
त्वादेरपितदतिरिक्तवृत्तित्वात्॥नचतथाविषयत्वेकिंचिदेकाभावप्रतियोगितासामान्यशू
न्यावृत्तित्वेतत्॥अतएवातिरिक्तसामान्याभावस्याभाविधूमत्वाद्धेरप्यनवच्छेदकत्वापातात्
अप्रमेतत्साधनमपिसंगच्छतइतिवाच्यं॥वह्निघटवृत्तिद्वित्वेताणोतणोदहनवृत्तिद्वित्वा

स्वरूपसं
नातिरिक्त

वच्छिन्नप्रतियोगिताकाभावप्रतियोगितानतिरिक्तवृत्तिवह्नित्वाद्यावतिप्रसंगात्॥एतेनान्यू-
नवृत्तित्वविशेषणमपि परास्तं॥अत एव नानाप्रतियोगिकत्वैकप्रतियोगितांगीकारेपि न निस्ता-
रः॥लघुरूपसमनियतगुरुरूपेण च साध्यतायां सद्धेतावव्याप्तिः॥तादृश[illegible]त्वाप्र-
सिद्धेरिति चेन्न॥प्रतियोगितावच्छेदकानतिरिक्तवृत्तित्वस्याविवक्षितत्वात्॥स्वसमानवृत्ति-
कं चावच्छेदकं ग्राह्यं॥तत्त्वं च [illegible] स्वपर्याप्त्यधिकरणपर्याप्तवृत्तिकत्वं यावत्त्वादिकं तु न तथा॥
पर्याप्तिश्चायमेको घटः इमौ घटौ इति प्रतीतिसाक्षिकः स्वरूपसंबंधविशेष एव॥त्रित्वादिकमपि
न द्वित्वादिसमानवृत्तिकमिति द्वित्वादिना साध्यतायां नाव्याप्तिः॥घटकं चावच्छेदकत्वं स्वरूप-
संबंधविशेषः॥एवं च प्रागुक्तयमोर्द्ववच्छिन्नेत्यत्र यद्धर्मान्यूनवृत्तिधर्मावच्छिन्नेति वाच्यं॥तेनोक्ता-
व्याप्तिनिरासः॥वस्तुतस्तु तद्धर्मावच्छिन्नप्रतियोगिताकाभाववत्संबद्धस्वविशिष्टसामान्यकत्वं
स्ववि[illegible]शिष्टसंबंधिनिष्ठाभावप्रतियोगितानवच्छेदकत्वं वा तदनतिरिक्तवृत्तित्वं
वक्तव्यं॥अत एव सत्तावान् जातेरित्यादौ जातिमन्निष्ठाभावप्रतियोगितावच्छेदकगुणान्य-
त्वविशिष्टसत्तात्ववत् तुल्यवृत्तिकत्वेपि सत्तात्वस्य न क्षतिः॥एवं स्वविशिष्टसंबंधिनिष्ठाभा-

वप्रतियोगितानवच्छेदकावृत्तिघटत्वं बोध्यम्॥तादृशप्रतियोगिताश्च विशिष्योपादेयाः॥ना-
तो गुरोरवच्छेदकत्वं विना दुर्वचत्वं॥प्रतियोगित्वं संबद्धत्वं च साध्यतावच्छेदकसंबंधेन बोध्यं॥
अतो न संबंधभेदमादाय दोषः॥कालिकविशेषणताविशेषेण च साध्यतायां तादृशप्रतियो-
गितावच्छेदकत्वं अनित्यवृत्तिद्वाक्तित्वे प्रसिद्धं॥अभावश्च प्रतियोगिव्यधिकरणो बोध्य॥नच
मौलमिदमीयं च प्रतियोगिवैयधिकरण्यमनुपादेयं॥संयोगत्वाद्यवच्छिन्नाभाववति संयोगत्वा-
दिविशिष्टस्य वृत्तेर्गुणादिनिष्ठाभावप्रतियोगितावच्छेदकद्रव्यत्वत्वद्रव्यमात्रसमवेतत्वाद्यव-
च्छिन्नाभाववति चावृत्तेरव्याप्त्यतिव्याप्त्योरनवकाशादिति वाच्यं॥धूमवान्वह्नेरित्यादौ अतिव्या-
प्तेः॥न ह्युत्पत्तिकालावच्छेदेन महानसादौ किंचित्संयोगेन वर्त्तते येन वह्निमद्योगोलकनिष्ठात्यंता-
भावप्रतियोगितावच्छेदकायोगोलकावृत्तिद्रव्यत्वावच्छिन्नाभाववद्वृत्तित्वं धूमत्वविशिष्टस्य सं-
भाव्येत॥प्रतियोगितयोरेकसंबंधावच्छिन्नत्वस्य विशेषणताविशेषावच्छिन्नत्वस्य वा विवक्षणे
पुनरनुपादेयमेव प्रतियोगिवैयधिकरण्यं॥यत्राधिकरणे व्यभिचारस्तदन्यत्वत्वेन तत्प्र-
रकप्रमाविषयत्वत्वसाध्यवत्त्वप्रकारकप्रमाविषयत्वत्वादीनां साध्यतावच्छेदकविशिष्टसा-

दकतावच्छे

न्निष्ठाभावप्रतियोगितानवच्छेदकत्वान्न हेतुतावच्छेदकविशिष्टहेतुमन्निष्ठाभावप्रतियोगितावच्छे
दकावच्छेदकत्वाच्चातिव्याप्तिनिरासात्॥ तथाचविशेषणताविशेषावच्छिन्नयद्धर्मविशिष्टसंबंधिनि
ष्ठाभावप्रतियोगितानवच्छेदकत्वं तत्संबंधावच्छिन्नसाधनसमानाधिकरणात्यंताभावप्रतियो
गितासामान्ये तास्तिसाधने तद्धर्मविशिष्टसामानाधिकरण्यं व्याप्तिरिति पर्यवसितोर्थः॥ यत्र
सद्धेतुविशेषे साध्यतावच्छेदकं न प्रतियोगितावच्छेदकं तत्रैवैयर्थीतिरूपादेयेत्यपि वदंति॥ गौरव
प्रतिसंधानदशायामपि कंबुग्रीवादिमान्नास्तीतिप्रतीतिसत्त्वाद्गुरुरपि धर्मोवच्छेदकः प्रतियो
यो गितायाः॥ न चास्यास्तत्प्रातिस्विकाभावमात्रमवलंबनं तथाविधयत्किंचिद्व्यक्तिसत्त्वएव तादृश
प्रतीतेरनुदयात्॥ अतएवैकघटवति भूतले कंबुग्रीवादिमान्नास्तीति न शाब्दोप्रमाणं॥ प्रमा
णं च घटसामान्यशून्ये॥ न चैवं लघुरूपसमनियतानां गुरूणामव्याप्यतापत्तिः॥ गुणादिगुणकर्मान्य
त्वविशिष्टसत्त्वादिसमानाधिकरणाभावप्रतियोगितावच्छेदकत्वनिष्ठायाः प्रतियोगितायाः लाघवे
नद्रव्यादिनिष्ठाभावप्रतियोगितावच्छेदकत्वत्वेनैवावच्छेदात्॥ तत्तदवच्छेदकत्वव्यक्तीनां प्रातिस्वि
करूपेणाभावानां युगसहस्रेणापि ज्ञातुमशक्यत्वात्॥ एवं द्रव्यत्वत्वादिविशिष्टद्रव्यत्वादेर्व्या

शिवः

॥२४॥

रव्याप्यताप्रसंगोनुसंधेयः॥ उपदर्शितप्रकाराणामपि सत्त्वादिघटितत्वेन दुर्ज्ञेयत्वाच्च॥ अत
एव घ्राणग्राह्यगुणत्वादिना साध्यतायां द्रव्यत्वादेर्व्यभिचारित्वमपि संगच्छते इत्यपि के
चिदिति कृतं पल्लवितेन॥ ननु य एव मिलिता वह्न्यभावा जलह्रदादौ वह्निर्नास्तीति धियं
जनयंति त एव प्रत्येकं धूमवति महानसादौ वर्त्तंते॥ तत्र च तेषां स्वस्वावच्छेदकतत्तद्वह्नित्वाव
च्छिन्नवैयधिकरण्यनिरूपिकायाः प्रतियोगितायास्तदवच्छेदकमेव वह्नित्वमतो व्याप्तिः॥ न चैवं व
ह्नित्वावच्छिन्नस्य तद्वृत्तित्वान्न तथात्वं॥ तथा सति ह्रदवृत्तिधूमाभावप्रतियोगितावच्छेदकह्र
दवृत्तित्वावच्छिन्नस्य वह्निमदयोगोलकवृत्तित्वादतिव्याप्त्यापत्तेः॥ अयथानुगतं रूपं तत्त
दभावप्रतियोगितानां नावच्छेदकं अनवच्छेदकमेव तद्वदभावप्रतियोगितायाः अभावांतरे माना
भावात् तथा च तद्रूपावच्छिन्नसाध्यके व्यभिचारिण्यतिव्याप्तिरत आह॥ सामान्येति॥ संशया
न्यथानुपपत्तिप्रमाणयति॥ अन्यथेति॥ वायाविति॥ यद्यप्ययं संशयो न वायुविशेष्यकः तस्य
विशेषणत्वेनोल्लेखात्॥ न वा रूपविशेष्यकः तथा सति रूपतदभावयोर्विरोधिनो रको
तायां प्रकृतानुपयोगप्रसंगात्॥ तथापि वायुं रूपवान् रूपाभाववान्वेति रूपरूपाभावकोटिसं

तात्पर्यं॥ अंत्यस्तु रूपवत्तदन्योन्याभावकोटिक इति नाभेद इति संप्रदायविदः॥ विरुद्धयोरेकधर्मि
संबंधावगाहिज्ञानमेव संशयो न तु तदुभयप्रकारतापि निपतः॥ तथा च रूपतदभावविशेष्यको
वायुविशेषणको ऽपसाविति न व्याः॥ वायुवृत्तित्वतदभावकोटिको रूपधर्मिक एवायं संशयः अप
धिकरणे तत्तदभावान्यतरनिश्चयस्यापि तत्राधिकरणवृत्तित्वसंशयविरोधित्वात्॥ अ
न्यथा भूतले घटतदभावान्यतरनिर्णयेपि घटो भूतलवृत्तिर्न वेति संशयप्रसंगादित्यपरे॥ अ
यैतावंत्येव रूपाणीत्यनिर्णयाद्यावद्रूपाभावनिर्णये संशयो न विरुध्यत इति चेन्न॥ यावद्रूपाभा
वानिर्णय इत्यस्यैतावंतो रूपाभावास्तेषां॥ यावत्त्वेन तेषां यावंति रूपाणि तावदभावानां यावद्रूप
त्वेन तदभावानां वा निर्णय इत्यर्थः॥ न प्रथमद्वितीयो॥ तथा निर्णीतत्वादेव॥ नेतरो॥ प्रतियोगितद
भावयोर्यावत्त्वानुल्लेखेपि योग्यानुपलब्ध्या भूतले घटो नास्तीति निश्चमात्रादेव घटतदभावसं
शयोच्छेददर्शनात्तस्याप्यकिंचित्करत्वात्॥ न चातिरिक्तसंभावनाविरहसहकृत एवाभावनिर्ण
यस्तत्प्रतिबंधकः संभावना च रूपं पार्थिवादित्रितयभिन्नं न वेत्याकारा न निवर्तते चेयं रूपत्वावच्छे
दे नैतत्त्रितयभिन्नत्वाभावनिर्णयादेवेति वाच्यं॥ गौरवादिनाप्यतिरिक्तसंभावनाविशेषाभा
वः

शिवः

॥२५॥

भावं

निश्चये सामान्यसंशयदर्शनाच्च॥ अपथाभावस्य सामान्यावच्छिन्नप्रतियोगिताकत्वेन निश्चय
एव तादृशसंशयविरोधी॥ अन्यथा तवाप्यतिरिक्तप्रसंगात्॥ स च न प्रकृते॥ अभावस्य च
यावद्विशेषाभावाधिकरणवृत्तित्वविशिष्टस्य तदवच्छेदेन वा सामान्यावच्छिन्नप्रतियोगि
ताकत्वे॥ संभवति चेदं तादृशप्रतियोगिताया अतिरिक्तत्वात्॥ तेन नैकविशेषवतो विशेषां
तराभाववत्त्वेन सामान्याभाववत्त्वप्रसंगः॥ न च प्रतियोगितावच्छेदकभेदस्याभावभेदनियाम
कत्वाद्भेदसिद्धिः प्रतियोगिभेदस्य तत्त्वे एकघटप्रतियोगिकस्य प्रागभावादेश्च तु ध्वंस्याभेदप्र
संगादवच्छेदके तु भिन्न एव॥ तत्र क्वचित्तादात्म्यस्य क्वचित्संसर्गस्य क्वचित्पूर्वापरकालीनत
दत्वादेश्च तथात्वादिति वाच्यं॥ संसर्गप्रतियोगिविशेषणसाधारणस्यैकस्यावच्छेदकस्य
दुर्वचत्वात्॥ पूर्वापरकालीनत्वादेर्ध्वंसादिप्रतियोगितावच्छेदकत्वे प्रमाणाभावाच्च॥ किंचाव
च्छेदकभेदस्याभेदनियामकत्वेन तं ज्ञानकत्वेम त्पत्ताभावादिस्वरूपस्य तस्याजन्यत्वात्॥ नापि
तद्व्याप्यत्वं॥ वैयधिकरण्यात्॥ अत एव न तद्व्यापकत्वमपि॥ अभेदेप्यविरोधाच्च॥ न च तद्वि
रपधर्मावच्छिन्नप्रतियोगिताकत्वे॥ तदवच्छिन्नप्रतियोगिताकान्यत्वस्य व्याप्यं॥ मानाभावात्॥ अ

धर्मा

२६

तएवचममनियतसुखदुःखादितत्संख्यापरिमाणव्यक्त्यादिनानाधर्मावच्छिन्नोप्यनित्यएवा
भावः॥भेदसिद्धिस्तुभाववदभावस्यापिविरुद्धधर्माध्यासादेव॥अतएवचगगनादीनामवृत्तीनांसम
नियतानांचधर्माणामेकएवात्यंताभावः॥युगपद्विनष्टानामुत्पन्नानांवासमदेशानामस्तिबाधकं [illegible]
एवध्वंसःप्रागभावोवा॥व्यधिकरणधर्मावच्छिन्नप्रतियोगिताकोपिचेदभावःप्रामाणिकस्तदेकस्यैव
प्रतियोगितासर्वैरेवव्यधिकरणैर्धर्मैःसर्वैरेवचसमानाधिकरणैःसंबंधैरवच्छिद्यतामाकाशाभावएव
वातथास्त्विति॥मैवं।एवंहितत्तद्देशकालाद्यवच्छिन्नानवच्छिन्नतत्तदधिकरणवृत्तित्वेनवि
शिष्टस्यतत्तदवच्छेदेनवा एकस्यैवाभावस्यघटपटगोत्वाश्वत्वादिप्रतियोगिकत्वसंभवे
नतत्तद्देशेपिलुप्येत॥तत्प्रतियोगिकत्वंतत्स्वभावोनतत्राधिकरणवृत्तित्वस्यातत्स्वभावो
वच्छेदकत्वेसमानं॥अतएवसामान्यावच्छिन्नप्रतियोगिताकत्वंव्यासज्यवृत्तीत्यपिप्रत्युक्तं
अव्यासज्यवृत्तेस्तत्स्वभावस्यतत्त्वानुपपत्तेः॥अतिरिक्तकल्पनेचकिमपराद्धमतिरिक्ताभावेन॥
किंचव्यधिकरणयोर्घटपटयोर्द्वित्वप्रतीतिवद्व्यधिकरणानामपिविशेषाभावानांयुगपदिंद्रि
यसन्निकर्षेसामान्यावच्छिन्नप्रतियोगिताकत्वप्रत्ययोपिस्यात्॥अपिचरूपांतरेणसंबंधवि

प्रतीतेवि

विशेषा
शिवः
॥२६॥

धयावाव्यासज्यवृत्तिधर्मस्यज्ञानेनयावदाश्रयसंनिकर्षापेक्षा॥मानाभावात्॥एवंचएकाभावस
न्निकर्षेपिसामान्याभावबुद्धिप्रसंगः॥यादृशोचतस्यज्ञानेयावदाश्रयाणांसन्निकर्षापेक्ष्यतेतत्र
तेषांतदुद्देश्यज्ञानमपितदज्ञानेतदभेदज्ञानेचतदग्रहात्॥आश्रयभेदभ्रमेणतद्भ्रमदर्शनाच्च
नचात्रयावद्विशेषाभावानांप्रथममुपस्थितिःसंभवतितत्प्रतियोगिनांविशेषतःप्रथमम
नुपस्थितेरितिदिक्॥केचित्त्वनेनविशेषाभावानांसामान्यावच्छिन्नप्रतियोगिताकत्वस्य
तद्व्यासज्यवृत्तित्वस्यचकल्पनामपेक्ष्यलाघवात्सामान्यावच्छिन्नप्रतियोगिताकत्वेनैक
एवाभावःकल्प्यते॥कल्पनीयशरीरस्योभयत्वेप्येतदपेक्ष्यतस्यगुरुत्वात्॥विनिगमनाभा
वेपिचसामान्याभावसिद्धिरप्रत्यूहैव॥धर्मकल्पनातोधर्मिकल्पनायागुरुत्वेकल्पनीया
नेकत्वप्रयुक्तं॥नचातिरिक्ताभावस्यसामान्यावच्छिन्नप्रतियोगिताकत्वस्यानंतवाय्वा
धिकरणवृत्तित्वस्यचकल्पनामपेक्ष्यक्लृप्तानंतवाय्वाद्यधिकरणवृत्तिनांयावद्विशेषाभा
नामेवसामान्यावच्छिन्नप्रतियोगिताकत्वस्यतद्व्यासज्यवृत्तित्वस्यचकल्पनैवलघी
सीतिवाच्यं॥एवंसतिअभावमात्रासिद्धिप्रसंगादित्याहुः॥ ॥यद्वेत्यादि॥अयथात्र [illegible]

त्तिरूपादिसाध्यकैकव्यक्तिपृथिवीत्वादावव्याप्तिः॥नचतत्ररूपवत्त्वादिकमेवसाध्यता…
दकंपरसंबंधेनरूपवत्त्वादिकमेवतेनसंबंधेननतदभावःपृथिव्यादावितिवाच्यं॥रूपादेरसाध्य…
पत्तेः॥द्रव्यान्यत्वादिविशिष्टसत्त्वाद्यभावस्यद्रव्यादिवृत्तित्वेरसत्तादिसाध्यद्रव्यत्वादौऽव्या
प्तेश्च॥अन्यथाविशिष्टतयासत्तादेःसाध्यत्वेव्यभिचारिणिजातिमत्त्वादावतिप्रसंगात्॥तुल्या
द्यविषयतेचविशिष्टाभावस्यविशेष्यप्रतियोगिकत्वंद्वित्वाद्यवच्छिन्नसाध्याभावस्यतत्रसत्त्वाच्च
अभावप्रतियोगित्वंप्रतियोगित्वाभावःसचयेनरूपेणतद्रूपावच्छिन्नव्याप्यत्वेहेतौ॥अस्तिचायंरू
पादौरूपत्वादिनापृथिव्यादिनिष्ठाभावप्रतियोगित्वमितिप्रत्ययादि…इतिचेन्न॥तादृशप्र
तीत्याहिरूपत्वादौप्रतियोगितायाःअवच्छेदकत्वाभावोगृह्यतेनतुतदभावावच्छेदकत्वं॥सर्वत्रै
वरूपेपृथिवीनिष्ठाभावप्रतियोगित्वंनैकुत्रापिरूपेतदभावइत्यबाधितप्रत्ययात्॥अथोन्योन्या ॐ
धर्मेपिस्वस्वाभावच्छेदकःतदवच्छेदेनतत्तदभावोप्युक्तरीत्यासिद्ध्येत्॥प्रमेयधूमत्वेनवह्निमन्नि शिवः
ष्ठाभावप्रतियोगित्वमिति…प्रत्ययात्तदवच्छेदेनतादृशप्रतियोगित्वाभावस्यापिसुवचत्वाच्च
अथप्रमेयधूमत्वेनगौरवेणसामानाधिकरण्यप्रतियोगितावच्छेदकंविवक्षितंचात्रेयेतिचेत्॥अप त॥२१॥

सामानाधिकरण्यधूमैकव्यक्तिवृत्तितयावह्नित्वमपिनतदवच्छेदकंकंबुग्रीवादिमत्त्वादिनाचघटा
देरसाध्यतापत्तिरितिवक्तव्याकोपश्च॥अतएवप्रमेयधूमत्वंगौरवेणप्रतियोगितायाइवतच्छू
न्यतायाअपिनावच्छेदकंइत्युक्तावपिननिस्तारः॥अत्रवदंति॥अप्रतियोगित्वंप्रतियोगितान
वच्छेदक…धर्मवत्त्वं॥नचैवंपूर्वस्मादभेदः॥तत्रसाध्यजातीयसमानाधिकरणसाधनजातीय
त्वस्यअत्रसाध्यसाधनयोःसामानाधिकरण्यस्यव्याप्तित्वेतात्पर्यात्॥घटवयोस्ता
दृशप्रतियोगितावच्छेदकतत्त्वान्योन्याभावयोर्भेदेनभेदइत्यपिकश्चित्॥अस्त्येताभा
वगर्भवत्सामान्यविशेषभेदेनान्योन्याभावगर्भमपिव्याप्तिद्वयमाह॥यत्समानाधिकरणेत्यादि
लक्षणद्वयेनप्रथमेएकस्यसाध्याधिकरणं॥अस्याधिकरणाद्द्वितीयंलक्षणं॥अत्रयद्यपिनाना
व्यक्तिसाध्यकस्थलेतत्तत्साध्यवतःतत्तत्साध्यवत्त्वस्यचसाधनसमानाधिकरणान्योन्या
भावप्रतियोगित्वात्तदवच्छेदकत्वाद्वाव्याप्तिः॥तथापियद्रूपावच्छिन्नवत्त्वंतादृशान्योन्याभावप्र
तियोगितानवच्छेदकंतद्रूपावच्छिन्नसामानाधिकरण्यमित्यत्रतात्पर्यं॥वह्न्यादौतत्संयोग
तद्वद्वैवासाध्येसर्वत्रसाक्षात्परंपरयावागमकंवह्नित्वादिकमेवसाध्यतावच्छेदकंतदव…

ॐ

वत्त्वस्य च न तादृशान्योन्याभावप्रतियोगितावच्छेदकत्वमिति॥ यद्रूपावच्छिन्नं यादृशान्यो
न्यमेन वच्छेदकमिति वा यथायथं वक्तव्यं॥ शब्दैकस्यानुपादेयत्वात्॥ अन्ये इत्यादि॥ यद्य
क्तरीत्या सर्वत्र तादृशप्रतियोगितानवच्छेदकत्वपर्यन्तानुधावनस्यावश्यकत्वेन अपि किंचित्के
रमेव तादृशाभावप्रतियोगित्वं तथापि विशिष्टसामानाधिकरण्यरूपायाः व्याप्तेर्व्यधिकरणासंभ
वित्वेतासर्व्यं॥ व्याप्तिरेवेत्यस्य कालिकेत्यादिः॥ अन्योन्याभावगर्भलक्षणस्याप्यव्याप्यवृत्तिसाध्य
कस्थले तावद्व्याप्तिं निरस्यति॥ न चेत्यादि॥ अभेदस्येति॥ तथा च मूले महीरुहो विहंगमसंयोगी नेति
प्रतीतेरनुभूयमानविशिष्टभेदोल्लेखिन्या अपि शिखी विनष्ट इति प्रतीतिवत् विशेषणाभाव
विषयतामात्रं कल्प्यते बाधकबलात्॥ यत्र विशिष्टभेदे न बाधकं तत्र तथा प्रतीतिबलात्तत्सिद्धि
रप्रत्यूहैवेति नातिप्रसंगः॥ अत्र वदंति॥ अभेदस्य भेदाभावस्य ज्ञानं न बाधकं भेदवत्त्वप्रतियो
गितावच्छेदकस्य संयोगात्मनः तदभावस्याव्याप्यवृत्तित्वेन तदुपपत्तेः॥ यथा हि प्रतियोगितावच्छेद
कावच्छिन्नप्रतियोगिज्ञाने तद्वत्त्वं ताभावस्याग्रहात् अभावव्यवहाराद्वैसएव तदभाव इति कल्प्यते
तथा प्रतियोगितावच्छेदकधर्मग्रहे तद्वदन्योन्याभावस्याग्रहादभावव्यवहाराद्वैसएव तस्याभा

शिवः

॥२८॥

अवच्छेदकमूला... संयोगी न इत्याकार प्रतीतिः मूलेसंवादो)

न

वदिति निश्चीयते॥ औपाधिकोऽप्यव्याप्यवृत्तित्वात्॥ अत एव मूलावच्छेदेन कपिसंयोगे भेदाभा
वज्ञाने तथा॥ असंभवादसिद्धेश्च॥ नापि संयोगिभेदस्य वृक्षावृत्तित्वज्ञाने असिद्धेः तद्वृत्तित्वस्यै
वग्रहात्॥ नापि कपिसंयोगिभिन्नभेदज्ञानं॥ कपिसंयोगिभेदवत्तद्भेदस्याव्याप्यवृत्तित्वेनाविरो
धात्॥ नापि मूलावच्छेदेन तज्ज्ञाने॥ असिद्धेः॥ तद्धर्मवद्भिन्न भेदस्य तद्धर्ममात्रपर्यवसिततया क
पिसंयोगिभिन्नभेदात्मनः कपिसंयोगस्य मूलवृत्तित्वे बाधाच्च॥ न हि घटभिन्नभेदो घटत्वादतिरि
च्यते॥ आवश्यकॢप्तघटत्वेनैवोपपत्तौ अतिरिक्तकल्पनायां मानाभावात्॥ अन्यथा सर्वत्राभावस्याभा
वोऽतिरिक्त एव कल्प्येत॥ अत एवात्यंताभावप्रतियोगिनोरन्योन्याभावप्रतियोगितावच्छेदकयोः सामा
न्यत एव क्लृप्तो विरोधः॥ तत्र कपिसंयोगवत्यपि वृक्षे मूलेन कपिसंयोग इति प्रतीतेरन्यथानुपपत्त्या
तावदाद्ययोः ससंकोच्यतौ न ह्येषा प्रतीतिः कपिसंयोगिभेदविषयत्वेनोपपादयितुं शक्या॥ नियमतः
संयोगवत्त्वेन प्रतियोगिनोऽनुपस्थितेः प्रतियोगिकोटौ तदनुल्लेखाच्च॥ मूलेन कपिसंयोगीति प्रती
तेस्तु शिखी विनष्ट इतिवद्विशेषणस्याभावमात्रविषयत्वेनोपपन्नत्वादन्योन्यो तिमयोः
परास्तौ॥ अन्योन्याभावांतरस्य प्रतियोगितावच्छेदकांतरसमानाधिकरणतया स्वस्वप्रति

वच्छेदकासामानाधिकरण्यपर्यवसायिनोविरोधस्यस्वत्वघटिततया विशेषणएववि[illegible]
ऽपत्यंताभावप्रतियोगिनोरिवान्योन्याभावप्रतियोगितावच्छेदकयोरबाधितसामानाधिकर
णुभवेनप्रतिरुद्धतया तथाविधविरोधकल्पनायाऽनवकाशाच्च॥ किंचशिखीविनष्टइतिप्रतीते
र्विशिष्टध्वंसोल्लेखिन्याविशेष्येतद्बाधादास्तांविशेषणध्वंसविषयतानसंयोगीतिप्रतीतेर्विशिष्ट
से ५ भेदमवगाहमानायाः कथंविशेषणसंसर्गाभावविषयत्वेनोपपत्तिः॥ नखलुसहस्रेणापिबाधकैरिदंज
तमितिप्रतीतेरंगत्वावलंबनत्वंव्यवस्थापयितुंशक्यते॥ नचविशेषणभेदएवतस्याविषयः॥ ऽप
त्रेपिनसंयोगीतिप्रत्ययापत्तेः॥ पुण्यतेचान्योन्याभावोपिऽप्यव्याप्यवृत्तिः॥ कथमन्यथाप्रकृतादृशा
यांघटादावयंनश्यामोदंडादिविरहसमयेचैत्रादौनायंतेदंडवानित्यादयोव्यवहाराः॥ नचतत्र
विशेषणतयासंसर्गाभावएवप्रतीयते॥ ऽननुयोगिनिसप्तमींविनातदनुपपत्तेः॥ नखलुभूतलेघ
टोनेत्यादिवाक्यानिकदाचिदपिसंसर्गाभावंबोधयंति॥ तथात्वेवाघटेनघटइत्यादेरपिप्रसंगात्॥ ऽप
पिचविशिष्टवाचकदंड्यादिपदेभ्योधर्म्युपसर्जनतयोपस्थितस्यदंडादेः कथंप्रतियोगित्वेनाभावेऽन्वयः॥
इतरविशेषणत्वेनोप स्थितस्यनिराकांक्षतयाऽन्यत्रविशेषणत्वेनान्वयायोगात्॥ नचात्रविभि[illegible]स्था
पि य

स
पकंपदंविशेषणमात्रपरंतथात्रिचैत्रोनदंडोघटोनश्यामंरूपमित्यादेरपिदंडादिसंसर्गाभावप्रतीतेर्दुर्वा
रत्वात्॥ एतेननञोऽभावबल्लाक्षणिकतया विनैवसप्तमीमन्वयबोधसमर्थनंप्रत्युक्तं॥ एवंचचैत्रोनप
चतिइत्यादौवाक्याताच्छत्वयालक्षणयाधीपस्थितस्यकर्त्तुरेवभेदोभासतइ[illegible]त्यस्तु॥ वस्तुतोन
पचतिचैत्रोनेदंमैत्रस्येत्यादौविभक्त्यर्थस्यकृतिसंबंधादेरभावस्यबोधनेनञाससप्तमीनानपेक्ष्यते
ऽपेक्षतेचप्रातिपदिकार्थस्येतिनिपुणतरमुपपादयिष्यामः॥ नञोवैधर्म्यपरतयानश्यामइत्यादेःश्या
मादिविधर्मेत्यर्थः॥ वैधर्म्यंचरक्तत्वादिकमेव॥ यदाहुराचार्याः॥ श्यामाद्युक्तौविधर्मानलुप्यगित्यपि
वदंतीतिकृतंपल्लवितेन॥ संबंधत्वेनेति॥ निरूपितंतत्त्वमेतत्॥ कस्येति॥ दुःस्थंचानुगतायाऽपिव्या
प्तेर्यथाज्ञानमनुमितिहेतुस्तथावक्ष्यते॥ एते॥ ऽन्योन्याभावात्यंताभावगर्भे॥ तादृशेति॥ ननुद्वित्वा
दिकंप्रतियोगितावच्छेदकमेवनभवति किंत्वाभवत्येवपरंतुकुत्रानामेवस्वसमानाधिकरणतत्तद्भावविच्छि
न्नप्रतियोगिताकानामभावानांलाघवादित्यभिप्रायः॥ नाद्यः॥ एकैकाभावप्रतीतेःद्वौनस्तइतिप्रतीति
लक्षणत्वात्॥ शब्दादिनाद्वौनस्तइतिनिश्चयेप्येकैकाभावसंशयात्॥ विषयानुगमंविनानुगताका
रायोगात्॥ नचाभावस्यद्वित्वाधिकरणप्रतियोगिकत्वमात्रेद्वित्वसमानाधिकरणधर्मावच्छिन्ना

गिताकत्वं वा द्वयं नास्तीति प्रतीतेर्विषयः॥ तादृशद्वित्वाधिकरणव्यक्तिविशेषविरहिणि त...
भयशालिनि तादृशौ द्वौ न स्त इत्यप्रत्ययापत्तेः॥ द्वित्वसामानाधिकरण्येऽभानेपि प्रतीतेरनुगताका...
श्च॥ अत एव न तादृशप्रतीतेर्घटत्वपटत्वाद्यन्यतरावच्छिन्नप्रतियोगिताकाभावविषयत्वं॥ अन्यतर...
तुल्ये रूपेपि घटपटौ न स्त इत्यनुगतप्रत्ययापत्तेः॥ न च परंपरासंबंधेन द्वित्वसामान्याभाव एव द्वौ न स्त इति प्र-
तीतिविषयः॥ द्वित्वाधिकरणयोरेव प्रतियोगितया द्वैत्वात्॥ द्वित्वादेर्घटादिवृत्तित्वानुपस्थितावपि अं-
ततः शाब्देनापि घटपटौ न स्त इति प्रत्ययापत्तेश्च॥ अत एवैकविशिष्टापराभावेन तदालंबनं विरुद्धयोरपि
जलत्वपृथिवीत्वयोर्द्वित्वेनाभावप्र[illegible]त्ययादित्युक्तेत्याहुः॥ नान्त्यः। तथात्वेपि साध्यत-
दितोस्तादृशाभावप्रतियोगित्वानपायात्॥ अत एवैकाभावांतरमेकैकघटव-
तिजायमानायास्तिं विद्वद्द्वयवृत्तिचान्तत्पधमानायाघटौ न स्त इति प्रतीतेरुपपादयितु-
मशक्यत्वादित्यत आह अभ्युपगमेवेति। तद्धर्मवत्त्वमेव प्रतियोगितावच्छेदकं साध्यवत्त्वं
चेत्यर्थः। अभ्युपगमावच्छेदकत्वांशोपि लक्षणे तथैव विवक्षितं। मितिभावः। तच्चेति। स्वं सा-
धनत्वाभिमतं। तच्छाचे साधनसमानाधिकरणात्यंताभावप्रतियोगितावच्छेदका
यावंतो धर्मा यद्धर्मावच्छिन्नसमानाधिकरणात्यंताभावप्रतियोगिवच्छेदकास्तद्धर्मवि[illegible]ष्टा